Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री महावीराय नमः ॥

॥ आचार्य बुद्धि-कीर्ति-जितेन्द्र-कैलास-कल्याण-पद्मसागरसूरीश्वरेभ्यो नमः ॥

आचार्य श्रीकैलाससागरसूरि ज्ञानमंदिर

"ज्ञानतीर्थ"

श्री महावीर जैन आराधना केन्द्र

कोबा - गांधीनगर

Tel. : 079-23276204, 23276205, 23276252 Fax : 23276249 Website : www.kobatirth.org Email : kendra@kobatirth.org

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री नेमि-विज्ञानग्रन्थमाला रत्न-२३

(कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यकृतपद्यात्मकपरिशिष्टपर्वणो गद्यानुबन्धोद्धृतम्

श्रीजम्बूस्वामिचरित्रम्

(अन्तिमभवात्मकम्)

रचयिता—

शासनसम्राट्-प्रौढप्रतापशालि-तपागच्छाधिपति-आचार्यवर्य-श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कार-समयज्ञ-शान्तमूर्ति-
आचार्यश्रीविजयविज्ञानसूरीश्वरपट्टधर-सिद्धान्तमहोदधि-प्राकृतविद्विशारदाचार्यश्रीविजयकस्तूरसूरीश्वर-
शिष्यरत्न-व्याख्यानवाचस्पति-पन्यासप्रवरश्रीयशोभद्रविजयगणिवरशिष्यविद्वद्वर्य-
मुनिश्रीशुभङ्करविजयः

वीरसंवत्-२४८० नेमिसंवत्सर-५ प्रकाशकः—परीख रमणलाल छोटालाल विक्रमसंवत्-२०१०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्तिस्थानः—जसवंतलाल गिरधरलाल
रुपासुरचंदनी पोळ, घर नं० १२३८
अमदावाद

प्राप्तिस्थानः—सरस्वतीपुस्तकभंडार
हाथीखाना रतनपोळ
अमदावाद

गोधरावाला परीख रमणलाल छोटालालना धर्मपत्नी चंदनबहेन
तरफथी पोताना मातुश्री माणेकबहेनना स्मरणार्थे
भेट.

— छपाय छे. —
गद्यानुबन्धश्रीपरिशिष्टपर्व
गद्यकर्ता:—मुनिशुभङ्करविजय.

मुद्रकः—शाह गुलाबचंद लल्लुभाई,
श्री महोदय प्रीन्टींग प्रेस,
दाणापीठ–भावनगर.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमोत्थु णं समणस्स भगवओ महावीरस्स ।

परमपूज्य श्रीनेमि–विज्ञान–कस्तूरसूरि–पन्न्यासयशोभद्रगुरुवरेभ्यो नमः ।

(कलिकालसर्वज्ञ–श्री हेमचन्द्राचार्यकृतपद्यात्मकपरिशिष्टपर्वणो गद्यानुबन्धोद्धृतम्)

श्रीजम्बूस्वामिचरित्रम् ।

॥ श्रीशंखेश्वरपार्श्वनाथाय नमः ॥ श्रीराजगृहेनगरे पुष्कललक्ष्मीरिन्द्र इव नृपवरः श्रेणिको राज्यं पालयामास । तदीयसभाऽलङ्कारो नरवरशिरोमणिर्धर्मकर्मश्रेष्ठः श्रेष्ठी ऋषभदत्तनामाऽभूत् । स समस्तेष्टसिद्धिप्रदमन्त्रवर्णवत् “ मम देवोऽर्हन् गुरुस्तु साधु ” रित्येव रात्रिन्दिवं जपन्नासीत् । तन्मनोजलं सदा गुरुवचनकतकचूर्णयुतं विगतदुर्ध्यानमलं विमलं बभूव । तस्यैश्वर्यं सरोवरस्य सलिलमिव पथिवृक्षस्य फलमिव केषां केषां प्राणिनामुपकारकं नाभूत् ! । मत्या धर्मानुरागिणी गत्या हंसानुहारिणी तस्य धारिणीनाम्नी सधर्मचारिणी बभूव । तस्या विपुलतमगाम्भीर्यधैर्यमाधुर्यप्रभृतिगुणेषु सत्स्वपि शीलगुण एव सम्यक् प्रयासो बभूव । यतः कुलाङ्गनाः शीलालङ्कारा भवन्ति । सा सती गुप्तसमस्ताङ्गी नीरङ्गीभूषिणी सूर्यस्यापि करस्पर्शासहिष्णुरिव समचरत् । शीलविनयप्रभृतिनिरतिशय-स्वच्छगुणैः सागरमध्ये गङ्गेव प्राणनाथस्य हृदये सा व्यलीयत । नख–मांसयोरिव नित्यमिलितयोस्तयोर्द्विदेहैकहृदययोः स्नेहोऽखण्डितो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बभूव । एकदाऽपत्यरहिता धारिणी निष्फलाया लताया इव मम निःसन्तानं जन्म व्यर्थमिति दध्यौ । धन्यजीवनानामेव स्त्रीणां क्रोडे सुधारस इवाङ्गे शीतलत्वं जनयन् पुत्रः क्रीडति । तत्रापि पुत्ररहितो गृहनिवासः पापाय तापाय च जायते, लवणहीन–कुभोजनवन्मह्यं गृहनिवसनं न स्वदते । ततः पुत्रचिन्तातुरा धारिणी रहसि तत्पतिना पृष्टा–“ प्रिये ! कुतो विषीदसि ! ” ततो धारिणी प्राणनाथं मानसं दुःखं निवेदयामास । यद्यपि प्राणपतौ सा निजदुःखं स्थापयामास, तथापि तन्नाक्षीयत । प्रत्युत स्वेष्टपूर्तिविरहाद् भूयोऽधिकमवर्द्धिष्ट । सा तेन हृदयशल्याऽतुल्यदुःखेन नित्यं द्वितीयाचन्द्रकलेव कृशभावमशिश्रियत् ।

एकदा धारिणीपतिर्धारिर्णीं पुत्रालाभदुःखं विस्मारयितुकामः प्रेमपाथोधिप्रवाहोपमया वाचोवाच–“ प्रिये ! वयं वैभारभूधरमद्य गच्छामः, तत्र नन्दनवनोद्यानरमणीयोद्याने रंस्यामहे ” । ततो धारिणी पतिदेववाचं माननीयतयाऽऽधिविस्मारणकामनया च स्वीचकार । तत ऋषभदत्तोऽपि सज्जीकृते हंसलोमकोमलतूलिके रथे प्रियया सह समारुरोह । एवं तौ जायापती संयोजिताश्वं श्रेष्ठमहारथमध्यारूढो वैभारगिरिं प्रति प्रययतुः ।

रथोपरि समारूढ ऋषभदत्तो मार्गे स्वप्रियां वार्तयति–“ हे प्रिये ! इयं वाह्यालीभूमिर्वाह्यमानाश्वफेनबुद्बुददन्तुरा श्रेणिकनरेशस्य प्रतिभाति । इमे नगरसमीपतरवो गजबन्धनोन्मूलितत्वक्स्कन्धा मत्तगजराजाऽऽलानतां सूचयन्ति । अमूनि सुन्दराणि गोकुलानि मदीयमहारथध्वनिना वृषभभाङ्कारैः समुत्थापितश्रवणवत्ससमूहानि राजन्ते । हे कृशोदरि ! एते पिकीस्वरौषधीभूतपल्लवास्तरुणरसालतरवः शोभन्ते । इमे रथनिर्घोषभीरवो मृगा भूमिं जिहासन्तः प्रायो वायुमारूढा इव गगनं गच्छन्ति । वारिवर्षिण इमेऽरघट्टा द्वितीयमूर्तिधारिणः पुष्करावर्तमेघा इव इक्षुवणेषु राजन्ते । एवं दर्शनीयदर्शनैः प्रियां विनोदयन् सपरिवार ऋषभो वैभारगिरिमगमत । तौ दम्पती रथाद्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वैभारगिरिवरोद्यानदिदृक्षानृत्यन्मनोरथौ समुदतरताम् । मार्गस्थप्रत्येकतरूणां नामधेयानि पृच्छन्ती स्वादूनि निर्झरजलानि भूयोभूयः पिबन्ती पदेपदे स्निग्धतरुच्छायासु विश्राम्यन्ती शीतलकदलीदलैः सुखस्पर्शमाचरन्ती शुकालापैर्हसन्ती मृगबालेषु वत्सला क्रोडाऽऽरोपितबालवानरीषु परमोत्कण्ठिता धारिणी पतिदत्तकरावलम्बनेन तत्सुखेन शनैः शनैर्गिरिमारोहयाञ्चक्रे । तत्पर्वत ऋषभदत्तो मनोहरां पर्वतोद्यानसम्पदमङ्गुल्या धारिणीं दर्शयांबभूव–" हे प्रिये ! फलभारनम्रा इमा मातुलिङ्गीः प्रेक्षस्व । ताम्रवर्णपुष्पैर्विश्रान्तसायन्तनमेघा इवेमा दाडिमीः पश्य । अमी ताला नृत्यन्मयूरकलापानुकारिदला मण्डपीभूतमृद्वीकामण्डपाः सूर्यकिरणानामपि दुर्गमाः प्रतिभासन्ते । अलिकुलच्छलात् परस्परसौरभ्यदानैरेताः पुष्पजातयः स्वाजन्यमुद्घोषयन्त्यत्र । जम्बूकदम्बमाकन्दपारिभद्रप्रभृतितरुभिरयं गिरिश्छायया चोलकं वसान इव प्रतिभाति । ऋषभः श्रेष्ठी तत्र शीघ्रमागतं खेचरमिव सिद्धसुतं यशोमित्रं श्रावकं स्वबन्धुमिवादर्शत् । ततश्च ऋषभः श्रेष्ठी सिद्धपुत्रमवार्तयत्–"त्वं मे खलु साधर्मिकोऽसि तत् कथय क्व गमिष्यसि ?" । स उवाच–" श्रेष्ठिन् ! अस्मिन्नुद्याने भगवतः श्रीमहावीरस्य शिष्यः पञ्चमो गणधरः सुधर्मा समवसृतोऽस्ति । हे मित्र ! तं वन्दितुमहं गच्छामि । यदि ते तद्वन्दनेच्छा तर्हि त्वमपि त्वर, अहमग्रेसरामि । श्रेष्ठयुवाच–" हंहो मित्र ! तत्राहमपि सपत्नीक आगच्छामीति तेनैव सह तौ दम्पती जग्मतुः । ततस्ते त्रयोऽपि यथाविधि द्वादशावर्तवन्दनेन श्रीसुधर्मस्वामिनं भक्त्या वन्दित्वाऽग्रे समुपाविशन् । बद्धपाणिपुटास्ते च सुधर्मस्वामिनो धर्मोपदेशामृतं श्रवणपुटैरतितरामपुः ।

अथावसरे सिद्धपुत्रः श्रीसुधर्मस्वामिनमप्राक्षीत्–" भगवन् ! यन्नाम्ना जम्बूद्वीपः ख्यातः सा जम्बूः कीदृशी विद्यते ?" ततः सुधर्मस्वामी तां जम्बूं जात्यरत्नमयाकृतिमकथयत्, तन्मानप्रभावस्वरूपादि चाख्यत् । तदा धारिणी चावसरमासाद्य भगवन्तं गणधरमपृच्छत्–" प्रभो ! मम पुत्रो जनिष्यते न वा " इमं प्रश्नमाकर्ण्य सिद्धपुत्रोऽवदत्–" हे धारिणि ! महापुरुषं सावद्यं प्रष्टुं नार्हसि, यतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महर्षयः जानन्तोऽपि सावद्यं न जल्पन्ति, हे कल्याणि ! जिनपादोपदेशेन निमित्तज्ञानकुशलोऽहमेव तत्कथयामि तच्छृणु--धीरस्वभावो मनसा कायेन च पराक्रमी शिलापृष्ठे समुपाविष्टः सुधर्मास्वामी त्वया यत् पुत्रजन्म पृष्टस्तत्रेदं बोध्यम्, "यदा स्वप्ने त्वं क्रोडस्थितसिंहं द्रक्ष्यसि ततो गर्भे पुत्रसिंहं धारयिष्यसि, समये प्रसिद्धजम्बूवृक्षवद् गुणरत्नमयश्च जम्बूनामा देवताकृतसन्निधिस्तव पुत्रो भविष्यति । ततो धारिण्युवाच–" विद्वन् ! तर्हि जम्बूदेवतामुद्दिश्याष्टोत्तरशतमाचाम्लान्यहं करिष्ये " । ततस्ते त्रयोऽपि वन्दितसुधर्मस्वामिचरणकमला वैभारगिरिशिखरादुत्तीर्य स्वपुरं जग्मुः । ततस्तौ दम्पती सिद्धपुत्रवचनप्रत्याशया गृहस्थतां पालयन्तौ कालं गमयामासतुः ।

एकदा धारिणी स्वप्ने श्वेतवर्णं सिंहमपश्यत्, तेनातिप्रसन्ना सा तत्स्वप्नं स्वामिनं कथयामास । ऋषभः प्रत्युत्ततार–" प्रिये ! अनेन स्वप्नेन मम विश्वासोऽजनि यत् सिद्धपुत्रवचनं तत् सर्वं सत्यमेव । हे महाभागे ! पवित्रचरित्रः शुभलक्षणो जम्बूनामा पुत्रस्तवावश्यमुत्पत्स्यते । " अथ समये जाते तदा विद्युन्मालिसुरो ब्रह्मदेवलोकाच्च्युत्वा धारिणीकुक्षौ शुक्तौ मौक्तिकमणिरिवावततार । ततो धारिण्या देवगुरुपूजनेषु दोहदः समजनि, यतो नारीणां दोहदा गर्भभावानुसारिणो भवन्ति । ऋषभः श्रेष्ठी भूयसा धनेन तद्दोहदमपूपुरत्, श्रेष्ठ्यपि धनव्यये धर्मकार्ये उत्पन्नदोहद इवाभूत् । क्रमेण धारिणी पुष्यद्गर्भाऽतिमन्दं गर्भक्लेशागमभीत्या सावधानेव सञ्चचार । तस्याः कपोलफलकावतिपाण्डुतया प्राभातिकचन्द्रबिम्बसदृशावभूताम् । ततः सार्धसप्तदिनाधिकनवमास्या धारिणी दीप्तिजितसूर्यं पुत्रं प्रासूत । तदर्षभस्य गेहे मुक्ताचूर्णेव घटितैरतिविशदैरक्षतैः पूर्णानि सुवर्णपात्राणि प्रविविशुः । श्रेष्ठिनि कुलवृद्धस्त्रीक्षिप्तैश्च्युतैर्दूर्वाङ्कुरैस्तदासनाऽऽसन्नभूमितले दूर्वावणमिव बभूव । ऋषभगृहद्वारे सकलकल्याणप्रधानानि बहुविधानि तूर्यवर्याणि लक्ष्मीनृत्यनिबन्धनं नेदुः । कुलाङ्गनाश्च नवकुसुमस्तबकभूषितकेशपाशा मधुमत्तकोकिलस्वरेण संगायन्त्यो ननृतुः, ऋषभश्च विशेषतो देवगुरुपूजां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यधात् । प्रार्थ्यमानोऽर्थिभिस्तेभ्योऽत्यर्थमर्थममन्दानन्दतुन्दिलो व्यतार्षीच्च । शुभदिने सानन्दः श्रेष्ठी स्वयं सूनोर्जम्बूतरुनाम्ना जम्बूरिति नामाकर्षीत् । पितरौ तं शिशुमङ्कगतमुल्लापयन्तौ रात्रिन्दिवं विस्मृतान्यकार्यौ हर्षप्रकर्षवातुलावभूताम् । जम्बूकुमारोऽपि पित्रोरङ्कालङ्कारीभूतः क्रमेण तयोर्मनोरथवद् ववृधे । पित्रोराशालतातरुः स ऋषभनन्दनः क्रमेण यौवनवयः प्रपन्नः पाणिपीडनयोग्यो बभूव ।

इतश्च तस्मिन्नेव नगरे समुद्रप्रियनाम्नः श्रेष्ठिवर्यस्य पद्मावती नाम्नी स्त्री बभूव । सम्पदा समुद्रस्येव समुद्रदत्तनाम्नः श्रेष्ठिनो गुणवती कनकमालाऽभिधा स्त्री बभूव । तथाऽद्भुतलक्ष्म्या गरीयसः सागरदत्तस्य विनयवती विनयश्री नाम्नी भार्याऽभवत् । परमद्धर्या कुबेरस्येव कुबेरदत्तनाम्नः श्रेष्ठिनः शीलधनवती धनश्री नाम्नी पत्नी बभूव । एतेषां जायापतीनां दिवश्च्युता विद्युन्मालिसुराङ्गनाः क्रमेण वक्ष्यमाणनाम्ना बभूवुः । यथा–समुद्रश्रीः १ पद्मश्रीः २ पद्मसेना ३ कनकसेना ४ चेति । तथा कुबेरसेनस्य कनकवती नाम्नी भार्या बभूव । श्रमणदत्तनाम्नः श्रीषेणा नाम्नी पत्नी बभूव । वसुषेणनाम्नो वीरमती नाम्नी प्रियाऽभूत्, वसुपालित नाम्नो जयसेना नाम्नी वनिताऽभूत् । तेषां दम्पतीनां क्रमेण नभःसेना १ कनकश्रीः २ कनकवती ३ जयश्री ४ श्चेति दुहितरोऽवातरन् ।

एकदा तासामष्टानामपि कन्यानां पितरो विनयोत्सुका जम्बूजनकमृषभं प्रार्थयामासुः–" आर्यवर्य ! अस्माकं रूपलावण्यमनोहराः कलाजलधिपारदृश्वर्यो गुणेश्वर्योऽप्सरःसमा अष्टौ कन्याः सन्ति । तासां विवाहकल्याणमित्रं यौवनं प्राप्तमस्ति । तदनुरूपं वरं तव जम्बूकुमारं नन्दनमालोकामहि । ये कुलशीलवयोरूपप्रभृतयो वरगुणा अपेक्ष्यन्ते ते सर्वे जम्बूकुमारे दृश्यन्ते । अयं वरो बहुपुण्यैर्लभ्योऽस्ति । तासामस्मत्कुमारीणां त्वत्प्रसादादयं जम्बूकुमारो दक्षजानां चन्द्र इव वरो भवतु । त्वं श्रीमान् कुलीनश्चासि, तत् त्वयि नः प्रार्थना न लज्जायै । किं बहुना ! सर्वथा विवाहसम्बन्धं विधायाऽस्माननुगृहाण " सूनुविवाहे स्वयमप्युत्कण्ठितस्तैः प्रार्थितश्चर्षभदत्तोऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हर्षात् तेषां वचनं स्वीचकार । ताः कन्या जम्बूनाम्नेऽतिश्रेयसे वराय वयं पितृभिर्वितीर्णाः स्म इति ज्ञात्वा धन्यंमन्या मुमुदिरे ।

अत्रान्तरे भगवान् सुधर्मस्वामी विहरन् भव्यप्राणिनो बोधयंस्तत्रैव नगरोद्याने समवससार । अथ श्रीसुधर्मस्वामिसमवसरणवृत्तान्तामृतसिक्तो जम्बूकुमारः स्कन्दवत् प्ररूढपुलकाङ्कुरः समजनि । ततो जम्बूकुमारः समवसृतं गणधरवरं सुधर्माणं वन्दितुं पवनवेगेन रथेन तत्स्थानमाश्रयत् । स श्रावकशिरोमणिः सुधर्माणं प्रणम्य पीयूषकण्डूषकल्पां तन्मुखारविन्दनिस्यन्दमानां धर्मदेशनां श्रवणपुटाभ्यां निपीय हतभाग्यपरमदुर्लभभववैराग्यभानूदयदलितहृदयान्धकारोऽभूत् । ततः श्रीसुधर्मप्रभुं प्रणिपत्य स भवबन्धनकर्तरीं परिव्रज्यामादातुं न्यवेदयत्–" हे परमेश्वर ! यावदहं पितरौ पृष्ट्वाऽऽगच्छामि तावत्त्वमत्रैवोद्याने धर्मतरुशोभामाश्रय । " सुधर्मस्वामिना तथाऽस्त्विति स्वीकृते जम्बूकुमारोऽनिलवेगजितं स्यन्दनमधिरुह्य शीघ्रं नगरद्वारमाजगाम । तदा पतिततिलस्यापि यथा भूमिस्पर्शावकाशो नाभूत्तथा गजाश्वरथाकुलं नगरद्वारमभवत् । ततो जम्बूकुमार एवमचिन्तयत्–" अहं यद्यनया नगरद्वारा पितृभवनं प्रवेष्टुं प्रतीक्षिष्ये तदा गरीयान् कालो व्यतिगमिष्यति । तत्रोद्याने श्रीसुधर्मस्वामिनं प्रतिष्ठाप्य भवनगमनाय विहङ्गमायमानस्य मेऽत्र स्थातुं नोचितम् । तस्मादन्येनैव पुरद्वारेण रथं त्वरयन् प्रविशामि । यत उत्कण्ठितस्यान्यो मार्गः श्रेयान्, प्रतीक्षणं न वरम् " इति विचिन्त्य स ऋषभनन्दनोऽतिशीघ्रं यावद् द्वारान्तरं जगाम तावत् तत्रापि वप्रं यन्त्रितमवलोकयामास । वप्रोपरितनभागे यन्त्रेषु गगनतलान्निपतत्कुलिशगोलककल्पा महाशिला लम्बिता अपश्यत् । स एवं व्यचारयत्–" एतादृश उपक्रमः परचक्रभयान्निर्मितोऽस्ति तदनर्थबहुलेनैतेन द्वारेणालम् । अनेन द्वारेण प्रविशतो ममोपरि यदि शिला पतेत् तदा नाहं न मे रथो न रथ्या सारथिश्च न वर्तेत । एवं चाविरतो मृत्युं प्राप्य दुर्गतिं प्राप्नोमि, यतः कुमरणप्राणिनां दुर्गतिर्भवत्येव, तेषां सुगतिस्तु गगनकुसुमवद् दुर्लभा । अहं स्वार्थभ्रष्टो मा भूवं तस्मादितोऽहं पुनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परावृत्य श्रीसुधर्मस्वामिचरणारविन्दमकरन्दास्वादमिलिन्दो भवामि " एवं विचिन्त्य ऋषभनन्दनः कुटिलग्रह इव स्वरथं वालयित्वा पुनस्तमेव गणधरचरणकमलालङ्कृतं प्रदेशं जगाम ।

तत्र जम्बूकुमारः श्रीसुधर्मस्वामिनमभिवाद्य यावज्जीवं मनसा वचसा कर्मणा च ब्रह्मचर्यं स्वीकरोमीति विज्ञपयामास । ततो भगवता गणभृताऽनुज्ञातो जम्बूकुमारो नियममङ्गीकृत्य प्रसन्नः कामविकाररहितो निजं धाम जगाम । पित्रोश्च तत्रैवं निजगाद्–" हे पितरौ ! अहं गणधरश्रीसुधर्मस्वामिमुखकमलादद्य सर्वज्ञप्रणीतं कर्मरोगशमनैकभेषजं धर्ममश्रौषम् । तेन जातभववैराग्यं परिव्रज्यां ग्रहीतुमुद्यतं मामनुजानीतम् । यत एष संसारो जन्मिनां कारागारसहोदरः खलु प्रतिभाति " । तन्निशम्य तदीयपितरौ गद्गदस्वरावेवमूचतुः– " वत्स ! त्वमसमयेऽस्मदाशालतोन्मूलनप्रभञ्जनो मा भूः । इदानीमावामिदं चिन्तयावः–यत् त्वं सवधूको भविष्यसि, लोचनकुमुदचन्द्रं नन्दननन्दनवदनं द्रक्ष्यावः " । विषयभोगयोग्येऽस्मिन् यौवने प्रव्रज्याग्रहणसमयो न तवास्ति । एतस्योचितमाचारं किञ्चिदपि किं न कामयसे ? । हे वत्स ! यदि तव प्रव्रज्यायां प्रचण्डपवनवेगवदाग्रहो विद्यते तथापि तव गुरवो वयं खलु स्म, इति तावदस्माकं किञ्चिद् वचनमङ्गीकुरु । वत्स ! या अष्टौ कन्यास्तुभ्यमस्माभिर्वृतास्तासां पाणिग्रहणेनास्माकं विवाहकौतूकं पूरय । कुमार ! एवं कृत्वा त्वं निःशङ्कं परिव्रजेः । अथ वयमपि कृतार्थास्त्वामनुप्रव्रजिष्यामः ।

तदा जम्बूकुमार उवाच—" आर्या ! युष्माकमस्मिन् निर्देशे कृते बुभुक्षोरशनादिव प्रव्रज्याग्रहणादहं न निषेध्यः " पितरावामित्युक्त्वा कन्यापितृकृपापरौ शीघ्रमूचतुः–" असौ मत्कुमारोऽस्मदाग्रहेणाऽष्टानां श्रेष्ठिनामष्टाभिः कन्याभिः सह विवाहं करिष्यति "। अथ पुनः कन्यापाणिग्रहणानन्तरं मत्कुमारः प्रव्रजिष्यति । हे श्रेष्ठिनो ! यदि यूयं पश्चात्तापपापं करिष्यथ, तदाऽधुना तद्विवाहं न कारयत ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं कथयतामस्माकं दोषो न देयः"। तच्छुत्वाऽष्टावपि सस्त्रीका महेभ्या अस्मिन् विषये किं कर्तव्यमिति विषीदन्तो निर्णेतुं परस्परं संलपन्ति स्म। तेषां श्रेष्ठिनां संलापमाकर्ण्य ताः कन्या ऊचुः–"हे पितरो! विचारेणालम्। अत्र निश्चयं शृणुत–युष्माभिर्वयं जम्बूकुमाराय दत्ताः स्मस्तर्हि नोऽयमेव स्वामी, वयं नान्यस्मै दातव्याः, लोकेऽप्येवं प्रसिद्धमस्ति।

"सकृज्जल्पन्ति राजानः, सकृज्जल्पन्ति साधवः।
सकृत् कन्याः प्रदीयन्ते, त्रीण्येतानि सकृत् सकृत्॥ १॥"

पितृचरणैर्जम्बूकुमाराय वयं समर्पिताः स्मः, तस्मात् स एवास्माकं गतिः। वयं तदधीनजीविताः संजाताः स्मः। तस्माद् यदि जम्बूकुमारः प्रव्रज्यामितरद् वा करिष्यति, तदेवास्माकं पतिव्रतानामुचितमस्ति।" ततः कन्याजनका जम्बूपितरमूचुः–"साम्प्रतं विवाहायोद्यता भवन्तु, प्रथमं वचनं प्रमाणम्"। ततस्तैः श्रेष्ठिभिः सह ऋषभदत्तेन सह नैमित्तिकमुखाचद्दिनात् सप्तमदिवसे विवाहमुहूर्तं निश्चिक्ये। ते महेभ्याः सोदरा भ्रातर इव मिलित्वा विशालं विवाहमण्डपं रचयामासुः। तन्मण्डपोपरि विचित्रवर्णवस्त्रैरुल्लोचो गगन-तलादाकृष्टसन्ध्यामेघखण्डैरिवाभूत्। तत्र सर्वत उच्चूलीकृतानि स्फुरन्ति मुक्तामाल्यानि चन्द्रेण स्वकिरणसर्वस्वं न्यासीकृतमिव प्रतिभान्ति स्म, स मण्डपः पवनान्दोलितपल्लवैरतितारैस्तोरणैर्वराह्वानेङ्गितमिव विपञ्चयन्नशुभत्। पुनश्च मण्डपः परितः स्वस्तिकन्यस्त-मौक्तिकैर्मङ्गलतरूणामुद्भवायोप्तबीजस्तोम इव व्यराजत्।

अथ जम्बूकुमारः शुभमुहूर्ते वर्णकेऽक्षेपि। कुसुम्भरक्तवस्त्रधारी स उदयकालिक सूर्य इव रेजे। वर्णके क्षिप्तास्ताः कन्या अप्यसूर्यम्पश्या राजमहिष्य इव बहिर्नाचरन्। अथ शुभे क्षणे स कुमारस्ताः कुमार्यश्च स्वस्वस्थानस्थिता विधिवन्मङ्गलस्नानमकार्यन्त।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra · www.kobatirth.org · Acharya Shri Kailassagarsuri Gyanmandir

कृतस्नानस्य जम्बूकुमारस्य क्षरज्जलाः केशा आसन्नलोचभयादश्रु मुञ्चन्त इव रेजुः ।

ततो गन्धकार्यः स्त्रिय उत्तंसलीलां कुर्वता कर्पूरागरुधूपेन जम्बूकुमारकेशानध्यवासयन् । गन्धकार्या तस्य कुमारस्य मूर्द्धनि पुष्पमाल्यगर्भितो जात्याश्वकन्धराकुटिलो धम्मिल्लो बबन्धे, जम्बूकुमारो मुखकमलप्रान्तविश्रान्तमरालयुगलशोभे तारे मौक्तिककुण्डले दधार । आनाभिलम्बितं फेनबुद्बुदावलिसन्निभं मुक्ताहारं परिदधे । चन्दनविलिप्ताङ्गः सर्वाङ्गामुक्तमौक्तिकस्तारावलिभिः पूर्णचन्द्र इव भृशं चकाश । ऋषभनन्दनो देवदूष्ये इवादूष्ये दशासहिते धवलवसने विवाहमङ्गलार्थं परिदधौ । ततः स जात्याश्वमध्यारोहत् । मायूरच्छत्रधारी स्वसदृशवयोवेषानुचरैः परिकरितो, नीरङ्गीवृतमुखो गीयमानबहुमङ्गलो वधूटीभ्यामुभयत उत्तार्यमाणलवणो जम्बूकुमारो वाद्यमानमङ्गलातोद्यः पठन्मङ्गलपाठको विवाहमण्डपद्वारं शीघ्रं ययौ । तत्र सुवासिनी साक्षात् तनुमतः कामदेवस्येव जम्बूकुमारस्य दध्यादिमङ्गलद्रव्यैरर्घं ददौ । कुमारो द्वारि न्यस्तं वह्निगर्भितं शरावसम्पुटं भङ्क्त्वा कल्याणसम्पद्गृहं मातृगृहं जगाम । ततः सोऽष्टाभिः कुमारीभिः सह तत्रोपविश्य कौतुकोद्वाहमङ्गलमङ्गीचकार । ततश्च शुभलग्नसमये चतुरिकाऽन्तरे गत्वा पित्रोर्विनयेच्छुर्जम्बूकुमारस्ताः कुमारिकाः परिणिनाय । ततो धारिणी तारामेलकके प्रसन्ना, कौतुकेषु ससम्भ्रमा, मङ्गलावर्ते सन्तुष्टा, मधुपर्के स्मितमुखी, यौतके सावधाना, अञ्चलमोक्षणे चतुरा, प्रणामे सबाष्पनयना, क्रोडस्थापनेऽत्यन्तप्रमुदिता, सती तनयविवाहकल्याण-सुखमिति लेभे । यतः स्त्रियोऽपत्ये विवाहिते हृष्यन्ति ।

विवाहानन्तरं वरस्य वधूनां च तावद् यौतकमभूत् येन सौवर्णः पर्वतो भवेत् । ततः समाजसहचारिणा मङ्गलदीपेन, धवलमङ्गलं मधुरं गायन्तीभिः कुलाङ्गनाभिः, पुरतो मधुरस्वरपूर्वकं वाद्यमानैर्मङ्गलतूर्यैः–गीत-नृत्य-वादित्ररमणीयेन प्रवर्तमानेन सङ्गीतकेन च हृष्टज्येष्ठ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कनिष्ठपार्श्वगामिबन्धुभिश्च सह स परिणीतवधूभिः परिवृतो निजागारं प्रविवेश । ततः प्रथमतः सर्वज्ञं पश्चात् कुलदेवतां वन्दित्वा वधूवराणां करेभ्यो विवाहबद्धकङ्कणमोक्षणमभूत् । तदनन्तरं हर्षितौ धारिण्यृषभदत्तौ जम्बूद्वीपनाथस्य देवस्य स्वयं सविधिपूजां चक्रतुः । ततः सकलालङ्कारभासुरो जम्बूकुमारोऽपि निजवनिताभिः सह निवासभवनं जगाम । तत्रर्षभनन्दनः सभार्योऽपि ब्रह्मचर्यधरोऽस्थात् । यतो महाशया विकारहेतावुपस्थितेऽपि विकारहीना भवन्ति ।

श्रीजम्बूकथानके प्रभवचोरवृत्तान्तः ।

इतश्चास्मिन् भरते विन्ध्यपर्वतसमीपे जयपुरं नाम नगरमस्ति । तस्मिन् विन्ध्यनामा राजाऽभवत् । तस्य प्रसिद्धौ प्रभवप्रभुनामानौ द्वौ पुत्रावभूताम् । एकदा विन्ध्यो राजा प्रभवे ज्येष्ठपुत्रे सत्यपि कनिष्ठाय प्रभुनामपुत्राय राज्यं केनचित् कारणेन ददौ । ततोऽपमानितो ज्येष्ठः प्रभवो जयपुरनगराद् बहिर्निःसृत्य विन्ध्याचलस्य विषमभूमौ वासं निर्मायाऽस्थात् । तत्र सपरिवारः स खात्रखननैर्बन्दिग्रहणैर्मार्गपातनैश्चौरैरन्यैश्च प्रकारैर्जीविकां चकार ।

अथैकदा तस्य गुप्तचरा आगत्य कुबेरस्याप्युपहासिनीं जम्बूकुमारसम्पत्तिं विज्ञापयाञ्चक्रुः । जम्बूकुमारविवाहोत्सवे मिलितान् बहून् अत्यर्थम् धनाधिपतीनर्थचिन्तामणीनिव स्थितान् कथयामासुश्च । ततश्च स दस्युशिरोमणिः प्रभवोऽवस्वापनिका–तालोद्घाटिनीभ्यां विद्याभ्यां सहितस्तदैव जम्बूकुमारभवनं प्रययौ । ततः प्रभवोऽवस्वापनिकया विद्यया जम्बूकुमारं विना सर्वं जाग्रतं लोकं स्वापयामास । साऽवस्वापनिका विद्या प्रचुरपुण्यशालिनो जम्बूकुमारस्य स्वापे नाशकत् । प्रायः पुष्कलपुण्यानामिन्द्रोऽपि विपत्तिदाने न समर्थः । ततो दस्यवो निद्रामुपागतानां सर्वेषामपि भूषणवसनादिसर्वस्वं ग्रहीतुं प्रावृतन् । ततो महामना जम्बूकुमारो लुण्टाकेष्वपि लुण्टत्सु कोपक्षोभ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रहितो लीलयेदमुवाच—" भो भो दस्यवः ! इह निमन्त्रितानागतान् प्राघूर्णकाञ्छयानान् विश्वस्ताञ्जनान् मा स्पृशत, एषामहं यामिको जागर्म्येषः । " ततो महापुण्यप्रतापस्य जम्बूकुमारस्येदृशा वचसा ते चौराः स्तब्धशरीरा लेप्यमया इव बभूवुः, प्रभवोऽपि निभालयन् करेणुभिर्गजेन्द्रमिव ताभिः स्त्रीभिः सह परिवृतं जम्बूकुमारं ददर्श, आत्मानं च निवेदयामास—" हे महात्मन् ! अहं विन्ध्यनाम्नो राज्ञः पुत्रोऽस्मि, मां मैत्र्याऽनुगृहाणेति स्वं परिचाययामास । हे मित्र ! स्तम्भनीं मोक्षणीं च विद्यां त्वं मह्यं देहि, अहं तुभ्यमवस्वापनिकां तालोद्घाटिनीं च विद्यां ददामि " । ततो जम्बूकुमार उवाच—" हे प्रभव ! निर्ममोऽहं नवोढा अपि स्त्रियोऽष्टावपि प्रभाते त्यक्त्वा दीक्षां ग्रहीष्यामि । भो प्रभव ! इदानीमप्यहं भावयतीभूतोऽस्मि, तेन हेतुना तवेयमवस्वापनिका विद्या मां स्वापयितुं नाशकत् । हे भ्रातः ! प्रातरहमिमां लक्ष्मीं तृणवत् परित्यक्ष्यामि, तर्हि वपुष्यपि निःस्पृहस्य मे तवानया विद्यया किं प्रयोजनमस्ति ? । तच्छ्रुत्वा प्रभवोऽपि तामवस्वापिनीं विद्यां संवृत्य जम्बूकुमारं प्रणम्य कृताञ्जलिरुवाच—" हे मित्र ! इदानीं नवयौवनो विषयसुखं भुङ्क्ष्व । त्वं विवेक्यसि, अत इमासु नवोढास्वनुकम्पस्व । इमाभिर्नवोढाभिः सह भुक्तभोगफलो भव । तत्पश्चाद् गृहीता परिव्रज्याऽपि तव शोभिष्यते । " जम्बूकुमारोऽप्युवाच—" हे मित्र ! विषयभोगजन्यं सुखं स्वल्पं बह्वपायं च भवति । तर्हि नो दुःखहेतुनाऽमुना किम् ? । प्राणिनो विषय-सेवनजं सुखं सर्षपादप्यत्यल्पीयः, दुःखं तु प्रचुरं मधुबिन्दुप्रभृतिपुरुषवत् ।

प्रभवं प्रति जम्बूकुमारकथिता मधुबिन्दुपुरुषकथा ।

तथाहि—कश्चित् पुरुषः सार्थेन देशाद्देशं परिभ्रमन् चौरमहानदीमटवीं प्रविवेश । तदा तस्यामटव्यां तं सार्थं लुण्टितुं चौरव्याघ्रा अधावन् । ततः सर्वे सार्थनिवासिनो मृगा इव पलायामासुः । स च पुरुषः सार्थात् परिभ्रष्ट आकण्ठमागतैः प्राणैरुद्गच्छत्कूपजलवन्महाटवीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राविक्षत् । तत्र विशालतरपर्वत इव स्यन्दमानमदनिर्झरः, उत्क्षिप्तकर आकाशान्मेघान् पातयितुमिव, पादप्रहारैरन्तःशुषिरिणीमिव पृथिवीं नमयन्, आध्माततामवद्रक्तमुखो जलधर इवातिगर्जन् साक्षाद् यमराज इव क्रोधोद्धुरो वनवारणो वराकं कान्दिशीकं तं पुरुषं प्रति दधाव । अहं मारयिष्यामि याहि याहीति प्रेरयन्निव शुण्डतुषारैः पुनः पुनस्तं पुरुषं वारणः ताडयामास । स पुरुषो भिया कन्दुक इव पतन्नुत्पतन् तेन हस्तिना गृहीतप्रायस्तृणावृतमेकं कूपं प्राप । तादृगवस्थायां गतो नूनं प्राणान् हरिष्यति, कूपे तु कदाचिज्जीवामीति स तत्र कूपे झम्पां ददौ । यतः प्राणिनां जीविताशा दुस्त्यजा भवति । तदवटतट एको वटवृक्ष आसीत्, तस्यैक आयतः पादो भुजङ्गमभोगवत् तत्कूपमध्ये लम्बमान आसीत् । कूपमध्ये पतन् स पुरुषोऽन्तरा तमेव पादमवलम्ब्य रज्जुबद्धघट इव तत्र तस्थौ । ततो हस्ती कूपमध्ये शुण्डं निवेश्य तन्मस्तकं स्पृशन्नपि करेण तं ग्रहीतुं तथा न शशाक, यथा मन्दभाग्यो रसायनौषधिम् । तत्र स मन्दभाग्योऽधो भागे यदा दृशमदात्तदा तत्कूपमध्यस्थितमेकं महाजगरमपश्यत् । सोऽजगरोऽपि मम दैवात् कवलमुपस्थितमिति ज्ञात्वा कूपमध्ये द्वितीयकूपमिव मुखं व्याददौ। पुनश्चतुर्दिक्षु चतुरः सर्पान् प्राणापहारिणो यमबाणानिव तत्र स ददर्श । दुष्टचेतसस्ते च सर्पास्तं पुरुषं वीक्ष्य फणामण्डल-मूर्ध्वीकृत्य तं दष्टुं धमनीसदृशैरास्यैः फूत्कारस्फूर्जितवातान् मुमुचुः । पुनः कृष्णश्वेतौ द्वौ मूषकौ तं वटप्ररोहं छेत्तुं चटचटेति दन्तककच-लक्ष्यं चक्रतुः । स मत्तो मत्तङ्गजस्तं पुरुषं शुण्डेनाप्राप्नुवन् वटमुन्मूलयन्निव वटशाखां जघान । हस्तिना कम्प्यमानेन वटप्ररोहेण स पुरुषो हस्तपादबन्धं कुर्वाणो बाहुयुद्धमिव रचयामास । एतर्हि गजताड्यमानवटशाखामध्यात्तोमरानना मधुमक्षिका मधुमण्डकं विहायो-दडयन्त । ता मक्षिकास्तं पुरुषं लोहसंदंशसदृशैस्तुण्डैः कीकसविश्रान्तैर्जीवाकर्षकैरिव ददंशुः । तदोत्पक्षमक्षिकाव्याप्तसर्वाङ्गः स पुरुषः कूपान्निर्गन्तुमुद्यतः कृतपक्ष इवालक्षि । तस्य पुरुषस्य मस्तके मधुबिन्दुर्मधुकोशान्मुहुर्मुहुः सलिलधानीमध्याज्जलबिन्दुरिव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निपपात । स मधुबिन्दुर्भालप्रदेशात्तस्य मुखं प्राविशत्, ततः स तं मधुबिन्दुमास्वाद्य महत् सुखं मेने ।

" हे प्रभव ! एतस्य दृष्टान्तस्य सारांशं शृणु–" अत्र यः पुरुषः स संसारी जीवः । या महाटवी सा चतुरशीतिलक्षयोनिसंसृतिः । यो गजः स मृत्युः । यः कूपः स मनुष्यजन्म । योऽजगरः स नरकः । ये सर्पास्ते क्रोधादयः । यो वटप्ररोहः स तदायुः । यौ कृष्णश्वेतौ मूषकौ तौ मासस्य कृष्णशुक्लौ द्वौ पक्षौ, तौ चायुश्छेदप्रसक्तौ । या मक्षिकास्ताः सांसारिणो व्याधयः । यो मधु-बिन्दुः स विषयजन्यं क्षणिकं सुखम् । इति ज्ञात्वा कश्चतुरस्तत्रानुरागं कुर्यात् ? । यदि देवोऽथवा विद्याधरस्तं पुरुषं कूपादुद्धरेत् तदा दैवदूषितः स नेच्छेत् किम् ? " इति श्रुत्वा प्रभव उवाच–" महानुभाव ! विपत्समुद्रे निमज्जन् को नाम नेच्छेत् ? नौकायमानं परोपकारपरायणं नरम् ? । तदा जम्बूरुवाच–" मित्र ! तदहमपारभवपारापारे समुद्धारके गणधरदेवे सत्यपि किं निमज्जामि ? । प्रभवोऽवोचत्–" भ्रातः ! स्वकीयौ स्नेहिनौ पितरावनुरागिणीर्गृहिणीश्च त्वं निष्ठुरः कथं त्यक्ष्यसि ? । " ततो जम्बूरभिदधौ– " अहो ! शत्रुरपि को बन्धुनिर्बन्धः ? यस्मात् तत्राऽऽसक्तो जनो कुबेरदत्त इव कर्मपाशेन नूनं बध्यते ।

प्रभवं प्रति जम्बूकुमारकथिता कुबेरदत्तकथा ।

तथाहि–मथुरानगर्यामेकोत्तमा वेश्याऽभूत् । तस्याः कुबेरसेनेति नाम । सा च कामदेवस्य सेनेवासीत् । सा चैकदा प्रथमगर्भेणा-त्यन्तं खेदिता सती तदीयजनन्या वैद्यस्य दर्शिता । " यतः क्लेशे समुपस्थिते वैद्यः शरणं भवति । " वैद्यश्च नाडीपरीक्षया तां नीरोगामक-थयत् । पुनः क्लेशकारणं तदुदरे युग्मं सुदुर्वहमुत्पन्नमिति न्यवेदयत् । अपि च प्रसवपर्यन्तं तेनैव हेतुना कुबेरसेनायाः क्लेशोऽस्तीति प्रोवाच । तन्माता तामुवाच–" वत्से ! प्राणनाशकेनानेन गर्भेण किं प्रयोजनम् ? तत् ते गर्भमहं पातयामि " ततो मातृवचः श्रुत्वा

२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुबेरसेनाऽवदत्–" मातः ! स्वस्ति गर्भाय, अहं गर्भदुःखं दुःसहमपि सहिष्ये; यतः सूकर्यप्यसकृदनेकसन्ततीर्जनयित्वाऽपि जीवत्येव; तत् कथं नाहं जीविष्यामि ?"। ततः सा गर्भक्लेशं सहित्वा पूर्णसमये पुत्रं पुत्रीं च जनयामास । ततस्तन्मातोवाच–" पुत्रि ! एते अपत्ये तव वैरिणी स्तः, यतस्त्वमाभ्यां गर्भस्थिताभ्यां मृत्युद्वारे स्थापिताऽसि। पुनरेतद्बालयुगलं तव यौवनापहारकं भावि। वेश्याश्च यौवनजीवना भवन्तीत्यतस्त्वं यौवनं जीवमिव रक्ष । हे वत्से ! उदरात् पतितमिदं युग्मं पुरीषवद् बहिस्त्यज । अत्र मोहं मा कार्षीः; अस्माकमियमेव कुलरीतिर्वर्तते । " कुबेरसेनोवाच–" हे मातः ! यद्यप्येवं क्रमोऽस्ति तथापि किञ्चिद् विलम्ब्यताम् । दशदिनानि यावदेतौ दारकावहं पोषयामि । एवं मात्रोपदिष्टा सा वेश्या कथञ्चिदपि तौ बालावहर्निशं दुग्धदानेनापोषयत् । एवं तौ दारकौ पोषयन्त्यास्तस्याः कालनिशा-सदृशमेकादशं दिनं प्राप्तम् । सा च कुबेरसेना कुबेरदत्त–कुबेरदत्तानामाङ्किते द्वे मुद्रिके कारयित्वा तयोर्दारकयोरङ्गुल्योर्न्यधत्त । ततो बुद्ध्या चतुरा सा दारुपेटां कारयित्वा तां रत्नैरापूर्य तत्र तौ दारकौ स्थापयामास । ततस्तां मञ्जूषां यमुनानदीप्रवाहे स्वयं प्रावाहयत् । सा च पेटिका हंसवत् तरन्ती निरुपद्रवं चचाल। ततः कुबेरसेनाऽपि निवृत्त्यापत्ययोर्नयनाञ्जलिभिस्तिलाञ्जलिं ददानेव निजभवनं जगाम ।

ततोऽसौ मञ्जूषा प्रातःसमये शौर्यनगरद्वारे प्राप्ता । द्वाभ्यां श्रेष्ठिपुत्राभ्यां लोचनपथगता सा जगृहे । तां चोद्घाट्य यदा तौ ददृशतुस्तदा तन्मध्ये एकं बालमपरां बालिकां चापश्यताम् । तत एकः श्रेष्ठिपुत्रो बालं जग्राह, अपरश्च बालिकामग्रहीत् । तौ तयोरङ्गुलिनिहितमुद्रिकाक्षरवाचनेन कुबेरदत्तकुबेरदत्तानामानावित्यज्ञासिष्टाम् । ततस्तयोरिभ्ययोर्गृहे प्रयत्नेन परिपाल्यमानौ तौ स्वाम्यर्पितनिधानवत् ववृधाते । तौ क्रमेणानेककलाविदौ बभूवतुः । क्रमेण कामदेवक्रीडोद्यानमभिनवं यौवनं तौ प्रापतुः । इमावनुरूपाविति श्रेष्ठिपुत्राभ्यां परमहर्षेण तयोः परस्परं विवाहोत्सवो व्यधायि । कलाकौशलशिक्षागुरुयौवनालिङ्गितयोस्तयोरङ्गे स्त्रीपुंसवाहनोऽनङ्ग आरोहत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकदा तयोर्वधूवरयोः परस्परप्रवर्धमानप्रेमवारिनदी द्यूतक्रीडा प्रावर्तत । तत्र कापि प्रस्तावे कुबेरदत्तस्य मुद्रिका सख्या कुबेरदत्तायाः करमध्ये न्यधीयत । कुबेरदत्ता तामूर्मिकां परीक्षणीयं नाणकमिव पुनः पुनः परित उरिक्षपन्ती ददर्श । कुबेरदत्ता व्यचारयच्चेयं मुद्रिकोर्मिकान्तरदर्शनाद् विदेशघटिता प्रतिभाति । ततो भूयोभूयस्तामूर्मिकां स्वां च पश्यन्ती सा चिन्तावेशात् स्फुरत्काया मनस्येवं निश्चिकाय। " केनचिद् एकस्मिन् देशे घटिते तुलया समे समानाक्षरनाम्नी च सोदरसदृश्याविमे मुद्रिके स्तः । एकः कुबेरदत्तोऽपराऽहं चेमौ द्वावपि मुद्रिके इव समानरूपौ भातृभाण्डे, न इत्यत्र संदेहोऽस्ति । आवां समानसर्वाङ्गौ खलु युग्मजातौ, अहो दैवेनेदृशमावां विवाहाकृत्यं कारितौ । पित्रा मात्रा वाऽऽवयोः समानापत्यवात्सल्येन समाने ऊर्मिके कारिते । " यत आवां सौदरौ स्वस्तत एवास्मिन् मम पतिबुद्धिरस्य च मयि स्त्रीबुद्धिर्नोत्पद्यते।" एवं विचार्य कुबेरदत्ता तथेति कृतनिश्चया कुबेरदत्तस्य करे तन्मुद्रिकाद्वयं चिक्षेप । कुबेरदत्तोऽपि तन्मुद्रिकाद्वयं दृष्ट्वा चिन्ताकुलो विमलहृदयः परं विषीदति स्म । ततः सुधीः कुबेरदत्तस्तां मुद्रिकां कुबेरदत्तायै दत्त्वा मातरमुपेत्य सशपथमपृच्छत्—मातः ! औरसादिबहुविधपुत्रेषु कीदृशोऽहं ते पुत्रोऽस्मि ? औरसो वा पितृत्यक्तः केनचिद्दत्तः ? कृत्रिमोऽन्यो वा ? एवं कुबेरदत्तस्य परमाग्रहवशान्माता पेटिकाप्राप्तित आरभ्य पूर्वोक्तां सर्वां कथां तस्मै कथयांबभूव । ततः कुबेरदत्तो जननीं प्रत्युवाच— " मातः ! आवां सौदरौ जानत्याऽपि त्वयाऽकर्तव्यं सोदरविवाहं किमनुष्ठितम् ? मम सैव माता श्रेष्ठा याऽवां परिपालयितुमसमर्था स्वभाग्यभाजनीकृत्य नदीप्रवाहेऽमुञ्चत् । यतो नदीवेगो मरणाय स्यात्; न त्वकर्तव्यकर्मकरणाय । तस्मान्मम मरणं वरम्, नाकृत्याचरणं जीवनं वरम् "। ततो मातोवाच—" हे पुत्र ! युवयोरतिमनोहरेण परस्परमनुरूपेण च रूपेण मन्दमतयो वयं मोहिता जाताः। तवानुरूपा कन्या तां विना न काप्यदृश्यत, न चास्याः सदृशस्त्वामृते कोऽपि वरः, अत एवैतदकृत्यमप्यस्माभिः कृतम् । तथापि न काऽपि क्षतिः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतो युवयोर्विवाहातिरिक्तं स्त्रीपुरुषसंयोगजन्यं पापकर्म नाभूत् । अद्यापि त्वं कुमार एव, तथैवेयमपि कुमार्येव । अथ तस्यै स्वस्ति भूयात् । तां भातृभाण्डकथां कथयित्वा परित्यज । सौम्य ! व्यापाराय दिग्यात्रां चिकीर्षुस्त्वं सकुशलं तां सम्पाद्य शीघ्रमागच्छेः, इत्यहं शुभाशिषं ददामि, हे पुत्र ! सकुशलं पुनरागतस्य तवापरया कन्यया सार्धं विवाहं सोत्सवं कारयिष्ये ।

ततो धर्मधीः कुबेरदत्तोऽपि मातृवचनमङ्गीकृत्य कुबेरदत्तामुपेत्य तं निर्णयं निवेदयामासावोचच्च–" हे भद्रे ! त्वं पितृगृहं याहि; त्वं भगिन्यसि, विवेकिन्यसि, दक्षासि च, तस्माद् यथोचितं कुर्याः। हे भगिनि ! आवां पितृभ्यां वञ्चितौ किं कुर्वहे !, अयं तयोर्न दोषः, "यत आवयोरीदृश्येव भवितव्यताऽऽसीत्। यतः पितरोऽपत्यं विक्रीणन्ति, मुञ्चन्ति, अकृत्येऽपि योजयन्ति तत्कर्मणामेव दोषः । " ततः कुबेरदत्तो भगिनीमेवमुक्त्वा विहाय च क्रयाणकभाण्डमादाय मथुरानगरीं प्रययौ । तत्र स व्यवहारेण पुष्कलं धनमुपार्जयत् । यौवनयोग्यं विलासं कुर्वाणश्चिरं न्यवसत् । एकदा रूपलावण्यवतीं वेश्यां कुबेरसेनां द्रव्यं दत्त्वा भार्यां व्यधात् । ततः कतिपये समये व्यतीते कुबेरसेनया सह वैषयिकसुखमनुभवतस्तस्यैकः पुत्रोऽजनि, " ईदृशं दैवनाटकम् । "

ततः कुबेरदत्ताऽपि मातरं गत्वाऽपृच्छत्–" माताऽपि तथैव मञ्जूषाप्रापित आरभ्य सर्वां कथां न्यवेदयत् । ततः सा तस्मिन्नेव काले परमं वैराग्यमासाद्य प्राव्राजीत्, दुस्तपं तपस्तेपे च । प्रव्रजन्ती सा तां मुद्रिकां क्वचित् संगोपयामास । तथा परीषहान् सहमाना स्वप्रवर्तिन्या सह विजहार । प्रवर्तिन्युपदेशमक्लेशं शिरसि निदधानाया अखण्डतपसस्तस्यास्तपस्तरोरवधिज्ञानपुष्पमुत्पेदे । "सैकदा कुबेरदत्तः कथमस्तीति चिन्तयामास ! ततः कुबेरसेनासङ्गवशात् सपुत्रं तं ददर्श । " निर्मलहृदयैवं शुशोच–" अहो ! सम्प्रति मम सहोदरो वराह इवाकृत्यकर्दममग्नस्तिष्ठति । एवं विचिन्त्य करुणाजलसारणिः सा तं प्रतिबोधयितुं साध्वीभिः सह मथुरापुरीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विजहार । साऽप्यार्या धर्मलाभपुरस्सरं कुबेरसेनापार्श्वे प्रतिश्रयं ययाचे । ततः कुबेरसेना वेश्या कुबेरदत्तामार्यां प्रणम्यैवं विज्ञपयांचकार–" हे आर्ये ! यद्यप्यहं वेश्याऽस्मि तथापि साम्प्रतमेकपतित्वेन पुनः कुलवधूरिव वर्ते । कुलीनपतिसंसर्गान्ममैषः कुलस्त्रीवेषोऽस्ति । अतः कुलीनाचरितेनापि तव प्रसादयोग्याऽहं, तस्मान्मम भवनसमीप उपाश्रयमाश्रित्य सर्वदेष्टा देवता इव सन्निहिता यूयं सर्वाः साध्व्यो भवत । ततस्तस्याः कल्याणकामधेनुरिव सपरिच्छदा कुबेरदत्ताऽऽर्या कुबेरसेनावेश्याऽर्पितोपाश्रये सुखपूर्वकं न्यवसत् । कुबेरसेनाऽपि दिवानिशं तत्राऽऽगत्य निजपुत्रमार्यायाः कुबेरदत्तायाश्चरणकमलसमीपे भूमौ लुठन्तममुचत् । ततो " यो जन्तुर्यथा बुध्येत तं तथैव बोधयेद् " इति न्यायेन साऽऽर्या तां बोधयितुं तं बालं वक्ष्यमाणप्रकारेणोल्लापयामास–यथा–" हे बालक ! त्वं मम भ्राताऽसि १, पुत्रोऽसि २, पत्युरनुजो देवरोऽसि ३, भ्रातृपुत्रोऽसि ४, पितृव्योऽसि ५, पौत्रोऽसि ६ " । " हे दारक ! यस्ते पिता स मे सोदरः ७, पिता ८, पितामहः ९, पतिः १०, पुत्रः ११, श्वशुरश्चास्ति १२ " । " हे बालक ! या ते माता सा मेऽपि माता १३, पितामही १४, भातृपत्नी १५, वधूः १६, श्वश्रूः १७, सपत्नी १८ च भवति " ।

ततः कुबेरदत्तार्यायास्तादृशं वचनं श्रुत्वाऽपृच्छत्–" हे आर्ये ! ईदृशं परस्परविरुद्धार्थं किं वदसि ? एतेनाहं विस्मितोऽस्मि ।" तत आर्या प्रत्युवाच–" शृणु सर्वं घटयामि–अयं बालो मम भ्रातैवं भवति–या मे माताऽस्ति, साऽस्यापि, अतो भ्राताऽयम् १ । योऽस्य पिताऽस्ति, स मे पतिरिति पतिपुत्रः पुत्र एव भवतीति ममायं पुत्रः २ । मम स्वामिनोऽयं लघुः सोदरोऽस्ति, इति मेऽयं देवरः ३ । मम भ्रातुरयं पुत्र इति भ्रातृव्य[भ्रातृजं]ममुं कथयामि ४ । अयं मम मातुः पत्युर्भ्राता भवति, तस्मादयं मे पितृव्यः ५ । मम सपत्नीपुत्रस्यायं पुत्र इति पौत्रोऽप्ययं भवति ६ । अस्य यः पिता स मे सोदरो भ्राता भवति, एकमातृकत्वात् ७ । अस्य यः पिता स

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्मातुः पतिरिति मातृपतित्वेनास्य बालस्य पिता ममापि पिता सम्पद्यते ८ । पितामहश्चैवं—बालोऽयं मन्मातृपतिसोदरतया पितृव्यो भवति, तस्य पिता पितामहः सुतरां सम्पद्यतेऽतोऽस्य पिता मम पितामहः ९ । अस्य पिता मम पतिरेवं भवति—" श्रेष्ठिपुत्रगृहेऽहं तेन परिणीताऽस्मि, अतः पतिर्भवति सः १० । मम बालपिता पुत्र एवं घटते—" पतिस्त्री सपत्नी—कुबेरसेना, तस्याः पुत्रः कुबेरदत्त इति पुत्रोऽपि स भवति ११ । देवरोऽयं बालस्तस्य कुबेरदत्तः पितेति देवरजनकत्वात् कुबेरदत्तः श्वशुरोऽपि भवितुमर्हति १२ । एवं बालस्यास्य या माता सा ममापि माताऽस्त्येव तदुत्पन्नत्वात् १३ । अस्य बालस्य माता मम पितामही चैवं घटते—" पितृव्योऽयं बाल उक्तस्तस्य माता भवत्यतः पितृव्यमातृत्वात् पितामही सम्पनीपद्यते १४ । भ्रातृपत्नी बालमाताऽनेन प्रकारेण—" मम भ्राता कुबेरदत्तस्तस्य स्त्रीत्वेन सुतरां भ्रातृजाया भवति " १५ । बालकमाता वधूश्चैवं—" सपत्नीपुत्रभार्या यतो भवति एकपतित्वेन कुबेरसेना सपत्नी भवति, तस्याः—पुत्रः कुबेरदत्तः, स च मम सपत्नीपुत्रत्वेन हेतुना पुत्रस्तस्य पुनः स्त्री कुबेरसेनेति पुत्रभार्या वधूर्भवत्येव १६ " । बालस्येयं माता मम श्वश्रूरेवं—" मम पत्युः कुबेरदत्तस्य मातेति पतिमातृत्वेन श्वश्रूर्भवति १७ । " बालकमाता सपत्नी ममैवं—" मम पतिः—कुबेरदत्तस्तस्य द्वितीया पत्नीयं जातेति एकपतित्वात् सपत्नी युज्यते १८ इत्यष्टादशसम्बन्धघटना । " कुबेरदत्ताऽऽर्येत्युक्त्वा स्वां मुद्रिकां विश्वासाय कुबेरदत्ताय ददौ । सोऽपि कुबेरदत्तस्तामूर्मिकामवलोक्य कुबेरदत्ताऽऽर्याकथितं सर्वं सम्बन्धं प्रत्यैत् । ततः कुबेरदत्तो विषण्णो भवादुद्विग्नः प्रव्रज्य तपस्तप्त्वा कालधर्मं कृत्वा स्वर्गमगमत् । अथ कुबेरसेना वेश्याऽपि तदा श्राविकात्वं प्रपन्ना । कुबेरदत्ताऽऽर्या च पुनः प्रवर्तिनीसकाशमासादयामास ।

एवं च यो जन्तुः स्वयमपि कर्मणा बध्यते तस्मिन् शत्रुसदृशे परिजने मूर्खाणां शुक्तौ रजतधीरिव बन्धुबुद्धिर्जायते । वस्तुतः स

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षमाश्रमण एव बन्धुर्यः स्वयं बन्धुरहितोऽप्यपरेषां बन्धमोक्षको भवति । अन्ये तु नाममात्रेण बन्धवः ।

ततः पुनरपि प्रभवो जम्बूमाह–" हे कुमार ! दुर्गतौ पततो निजान् पितॄन् रक्षितुं स्वं पुत्रं जनय । यतोऽपत्यरहिताः पितरोऽवश्यं नरकं गच्छन्ति; तस्मादपुत्रस्य तव पितॄणामृणात् कथं मुक्तिः स्यात् ? " । ततो जम्बूरुवाच–" हे प्रभव ! अयं ते मोहोऽस्ति यत् पुत्रादेव पितॄणां दुर्गतेस्तारणं त्वया प्रतीयते । हे प्रिय ! अस्मिन् विषये महेश्वरदत्तसार्थवाहदृष्टान्तोऽस्ति ।

प्रभवं प्रति जम्बूकुमारकथिता महेश्वरदत्तकथा ।

तथा हि–प्राक् ताम्रलिप्त्यां नगर्यां श्रीमान् महेश्वरदत्तनामा सार्थपतिरजायत । तस्य समुद्रनाम्ना प्रसिद्धः पिता जलेषु समुद्र इव धनेष्वतृप्तोऽभूत् । तस्यातिमायाविनी बहुलानाम्नी जननी जज्ञे । लोभावकरगर्तोऽर्थोपचयव्यसनी तस्य पिता मृत्वा तस्मिन् देशे महिषो बभूव । पतिवियोगादार्तध्यानरता तस्य जननी तस्यैव गृहे शुनी बभूव । महेश्वरस्य पार्वतीव महेश्वरदत्तस्य पत्नी सौभाग्यवती गाङ्गिलानाम्नी जाता । सा च श्वश्रूश्वशुरहीना सती निजगृहे एकाकिन्यवसत्; तस्माद् वने हरिणीव सा स्वच्छन्दचारिण्यभूत् । निजनाथं वञ्चयन्ती सा परपुरुषेण रेमे । एकाकिनीनां स्त्रीणां सतीत्वं न चिरं तिष्ठति । यतः कामदेव एकाकिनीरेकान्तस्थाः स्त्रियो दृष्ट्वा निर्भय इव नितान्तं प्रहरति ।

एकदा स्वैरं परनरेण रममाणायां गाङ्गिलायां महेश्वरो हट्टाद् गृहमकस्मादाययौ । तदा तौ विस्रस्तकेशौ रमणप्रयाससंजातभयौ कम्पमानजङ्घौ चकितलोचनौ पुंश्चली–जारौ परावृत्त्य गृहीताधोवस्त्रावगृहीतोत्तरीयवसनौ नग्नकल्पौ स्खलच्चरणौ तं दृष्ट्वा कान्दिशीकौ बभूवतुः । महेश्वरश्च लुब्धको भल्लूकमिव केशेषु गृहीत्वा मान्त्रिको भूताविष्टमिव तं जारं चपेटाभिस्ताडयामास । तथा कुम्भकारो मृत्तिकापिण्डमिव पादप्रहारैश्च तं मर्दयामास, पुनर्गृहप्रविष्टं कुक्कुरमिव लकुटेन चाताडयत्, किं बहुना ? महेश्वरस्तं जारमर्धप्राणमिव चकार । " मनस्विनां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हि चौरतोऽप्यधिकः कोपो जारे जायते "। कृतान्तस्य बन्धुना इव कुपितेन महेश्वरेणार्धमारितः स जारः कथमपि पलायाञ्चक्रे । किञ्चिद् गत्वा पतितः स गाङ्गिलाजारः कण्ठगतप्राणेष्विदं व्यचारयत्–" धिङ् मां यन्मरणप्रदमनार्यकृत्यमहमकार्षम्, तद्वाञ्छितदं तीर्थमिव मम मरणायाभूद् इदं तद्युक्तमेव । " एवं चिन्तयन् स जारो विपद्य गाङ्गिलाकुक्षौ स्वाहितवीर्ये शीघ्रमेव पुत्रतां प्राप । ततः पूर्णसमये गाङ्गिला पुत्रमजीजनत् ।

अथ गाङ्गिलापतिर्महेश्वरस्तं जारजातमपि पुत्रं स्वोत्पन्नमिव मन्यमानः प्रेम्णा लालयांबभूव । ततो महेश्वरो जनिततनयाया गाङ्गिलाया आगतमपि व्यभिचारिणीदोषं पुत्रस्नेहाद् व्यस्मरत् । पुत्रीभूतस्य तस्य जारजीवस्य धात्रीकर्माणि कुर्वाणः प्रमोदभाग् महेश्वरो न ललज्जे । वर्धमानं कूर्चकेशाऽऽकर्षकं तं पुत्रं कृपणोऽर्थमिव स हृदयाग्रे सदा दधार च ।

एकदा महेश्वरः स्वपितृमरणदिने प्राप्ते तं पितृजीवं महिषं तन्मांसेच्छयाऽक्रैषीत् । ततः पितृमरणतिथिमहेऽतिहर्षरोमाञ्चितो महेश्वरः स्वयं तं महिषमवधीत् । ततस्तन्महिषमांसं भुञ्जानो प्रमोदभाग् महेश्वरः क्रोडस्थाय तस्मै पुत्रायापि तद् ददौ । महेश्वरस्य शुनीभूता माता च तन्मांसं लिप्सुस्तत्राऽऽगमत् । सोऽपि मांसखण्डयुतास्थीनि शुनीकृते चिक्षेप । सा शुनी पवनान्दोलितधूमशिखाप्रवन्नृत्यता पुच्छेन स्वपतिजीवकीकसानि जघास । एवं पितृजाङ्गलं भक्षतः समुद्रपुत्रस्य गृह एको मुनिर्मासक्षपणभिक्षार्थी तत्राऽऽजगाम । स मुनिर्महेश्वरदत्तस्य तादृशं सर्वं वृत्तं ज्ञानप्रकर्षेण व्यजानात् । तज्ज्ञात्वाऽसौ मुनिरचिन्तयत्–" अहो तपस्विनोऽस्याज्ञानं धिक्, यत् पितुर्मांसं भुङ्क्ते, क्रोडे च शत्रुं वहति । इयं शुनी स्वपतेरस्थियुतानि मांसानि प्रमुदितमनाः खादति । " अहो संसार ईदृशोऽस्ति । " एवं सम्यग् ज्ञात्वा मुनिर्महेश्वरगृहान्निर्जगाम । तदा महेश्वरोऽपि धावित्वा तं वन्दित्वा च प्रोवाच–" हे भगवन् ! त्वमगृहीतभिक्षो मद्गृहात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किं निवृत्तोऽसि ? न ह्यहं भवतोऽभक्तोऽस्मि, तवानादरं न व्यधां, त्वां दृष्ट्वा हर्षुलोऽस्मि च ।" ततो मुनिरुवाच–"मांसभक्षकस्य गृहेऽहं न विहरे, तत एव भिक्षां नाऽऽदाम्; मम परमं वैराग्यं चाभूत् ।" ततो महेश्वरोऽस्य निदानमपृच्छत् । ततो मुनिरादितो महिषशुन्यादीनां कथां कथयामास । कोऽत्र प्रत्यय इति पृष्टो मुनिरुवाच–इमां शुनीं किमपि प्राग्भूमौ निखातं पृच्छ; तथा पृष्टा शुनी जातिस्वभावतः क्षितिं शय्यार्थमिव पादेन निधानस्थानं चखान । ततो विश्वस्तो महेश्वरो भवोद्विग्नः पात्रेषु धनं दत्त्वा परिव्रज्यामग्रहीत् । तस्माद् वदतां शिरोमणे ! हे प्रभव ! को निश्चयो यत् दुर्गतिसरसः पुत्राः पितरौ तारयन्ते ? अत्रान्तरे समुद्रश्रीर्जम्बूनामानमुवाच–"हे नाथ ! त्वं पश्चात्तापं कर्षकवन्मा गाः ।

जम्बूकुमारं प्रति समुद्रश्रीकथिता कृषीवलकथा ।

तथा हि–पृथ्व्यां प्रसिद्धे सुसीमनि ग्रामे धनधान्यादिसमृद्धो बकनामा कर्षकोऽभूत् । स वर्षासमये कृष्टे क्षेत्रे कङ्गूः कोद्रवांश्चावपत् । तस्य क्षेत्रभूमिरभिलोठितकाचेव जातकेशपाशेवोद्गतश्यामलदलैर्धान्यैरभूत् । प्रवर्धमानं तत् कङ्गुकोद्रववनं दृष्ट्वा मुदितः स क्वचिद् ग्रामे स्वजनातिथिः स्वग्रामतोऽतिदूरेऽभवत् । तत्र स्वजनैर्भोजने तस्मै गुडमण्डका दत्ताः । स च तेनापूर्वेणाऽऽहारेणात्यन्तं जहर्ष । तस्मात्प्रीतो ज्ञातीनपृच्छत्–"अहो युष्माकं जीवितं धन्यं येषां सुधोपमोऽयमाहारो मिलति । यदहं स्वप्नेऽपीदृशमाहारं नापश्यम् । कङ्गुकोद्रवदग्धान्नानस्मान् नृपशून् धिक् । ततोऽज्ञातगुडमण्डको ज्ञातीनपृच्छत्–"इमान्याहारवस्तूनि कानि ? कुत्र च जायन्ते ?" । ते च तस्मै प्रोचुः–"अरघट्टजलेन सिक्तेषु क्षेत्रेषूत्पद्यन्तेऽन्यधान्यवद् गोधूमाः । यदा गोधूमाः परिपक्वा भवन्ति तदा लूयन्ते विपिष्यन्ते वह्नितप्तायां लोहपाश्यां मण्डकाः पच्यन्ते च । इक्षवोऽपि क्षेत्रे तथैवोप्यन्ते; वृद्धिं गतानां तेषां निपीलनात् प्राप्तेन रसेन पात्रे पाकेन गुडः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समुत्पद्यते । " एवं गुडमण्डकविधानं विज्ञाय स कृषीवलो गृहीतेक्षुगोधूमबीजो निजग्राममाजगाम । ततश्च क्षेत्रे गत्वा फलितं कङ्गुकोद्रवं मातृशासितो बकनामा कर्षको झटिति लवितुं प्रारेभे । तदा पुत्रैरपि स प्रोक्तः—" हे पितः ! स्वकुटुम्बजीवातुमिमामर्धपक्वां कृषिं किं साधारणतृणवल्लुनीषे ? " ततो बकोऽवोचत्—" हे पुत्राः ! एभिः कङ्गुकोद्रवैः किम् ?, अहमत्र क्षेत्रे इक्षुगोधूमान् वप्स्यामि, यतोऽस्माकं खाद्या गुडमण्डकाः सन्ति । " ततः पुत्रा ऊचुः—" हे तात ! स्वल्पैरेव दिनैरिमे कणा निष्पत्स्यन्ते तान् गृहीत्वा यथारुचि त्वमिक्षुगोधूमान् वपेः । इयं निष्पन्नप्राया कृषिर्नश्यति, गोधूमेक्षुषु तु सम्प्रति संदेहोऽस्ति । क्रोडस्थिते बाले विनश्यति सति उदरस्थिते काऽऽशा ? । " एवं पुत्रैर्निवार्यमाणोऽपि बकस्तत् कङ्गुकोद्रववनं लुलाव । यतोऽसौ तत्र प्रभुरासीत् । ततः स मूढो बकस्तानि सस्यानि लवित्वा कन्दुकीडायोग्यां क्षेत्रभूमिं चकार । पार्श्वस्थितः कूपं खानयामास । परं वन्ध्यास्तनदुग्धमिव जलं न निरसरत् । तथा स कूपं खानं खानं अनिर्विन्नं पातालबिलसदृशमकारयत् । परन्तु जलस्य का कथा पङ्कोऽपि न निरगात् । ततश्च तस्य न कङ्गवो न वा कोद्रवा नेक्षवो न च गोधूमा अभवन् । तेन स बकः पश्चात्तापमाप । तस्मादैहिकं स्त्रीधनसुखं त्यजन्नामुष्मिकं संशयास्पदं सुखमाकाङ्क्षंस्त्वं द्वयोज्झितो मा भूः ।

समुद्रश्रियं प्रति जम्बूकुमारकथिता काककथा ।

ततो महामना जम्बूनामा स्मयमान उवाच—" हे समुद्रश्रीः ! अहं काक इव निर्बुद्धिर्नास्मि । तथाहि—नर्मदानदीतटे विन्ध्यगिरिवने एको यूथपतिर्विन्ध्याद्रेर्युवराज इव महाहस्त्यासीत्, स्वच्छन्दं वने विचरन् स गजो यौवनं व्यतीयाय । आयुर्नदीतटमिव वार्द्धकं प्राप । तस्मात् क्षीणबलः स वृक्षे दन्ताऽऽघातान् कर्तुमक्षमो ग्रीष्मे शुष्कनिर्झरो गिरिरिव मदरहितो शल्लकीकर्णिकारप्रभृतिवनभङ्गविमुख

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उच्चान्निम्ने निम्नादुच्चेऽवतारोत्तारासमर्थो दन्तपतनात् स्वल्पभुक् बुभुक्षया क्षामकुक्षिरस्थिभस्त्रासदृशशरीरो वार्द्धकेऽजनि । स गजोऽन्यदा शुष्कपर्वतनद्यां समुत्तरन् स्खलितपाद एकं गिरिकूटमिव भुवि पपात । स चोत्थातुमशक्तस्तत्रैव पादोपगमनं पालयन्निव तस्थौ । तथा-स्थितोऽसौ विपेदे । विपन्नस्य तस्यापानमांसं श्वजम्बूकनकुलादयो बुभुजिरे । तस्य गजस्य सकन्दरपर्वतोपमं विशालापानरन्ध्रशरीरं श्वापदैर्निवासीकृतमभूत् । तदीयापानयज्ञशालायां मांसार्थिनः काका द्विजा इव विविशुर्निर्जग्मुश्च । तत्रैको वायसो मांसभोजनादतृप्त उत्पन्नविट्कृमिरिवापानमध्य एव तस्थौ । तस्मिन् सारं प्राप्नुवन् स काष्ठमध्ये घुणवदधिकाधिकं मध्ये प्रविवेश । स्वशरीरेण परकाये प्रवेशलीलां कुर्वन् स काको योगीवाभूत् । स गजकायमांसं स्वच्छन्दं भुञ्जानोऽत्यन्तमध्यगतः पूर्वापरविभागाज्ञो बभूव । तस्य गजस्य मुक्तविष्ठं गुदरन्ध्रं रविकरैः पूर्ववत् संचुकोच । ततः स काकस्तस्य करिणः संकोचितापाने बद्धद्वारे करण्डे सर्प इव तत्रैव तस्थौ, स गजकायो वर्षर्तौ प्रवहन्त्या नद्या तरङ्गकरैर्नर्मदायामनीयत । नर्मदया च नक्राणामुपायनमिव तद्गजशरीरं तरत्प्रवहणमिव समुद्रमध्ये-ऽनीयत । तत्र तस्मिन् प्रविशता जलेन तत्कलेवरमार्द्रीभूतम् । जलेनैव कृतद्वारात् तस्मात् स काको बहिर्निर्जगाम । तस्य गजकायस्यान्तरी-पोपमस्योपरिष्टान्निषद्य स सम्यग् दिगन्तरं ददर्श । अग्रतः पार्श्वतः पश्चाच्च स जलमयं दृष्ट्वा दध्यौ—"समुड्डीय समुद्रात्तीरं गमिष्या-मीति" । स चोड्डीयोड्डीय समुद्रजलस्य प्रान्तं न प्राप; अपि तु तत्कलेवर एवोपविवेश । मीनमकरादिभिराक्रम्यमाणं तत्कलेवरं सागरे भाराऽऽक्रान्ता नौरिव सद्यो ममज्ज । सोऽपि निराधारो वायसः समुद्रे निममज्ज, जलाप्लावनभीत्येव सद्यः पञ्चत्वं प्राप ।

ततः स्त्रियो मृतवन्यगजसदृश्यः सन्ति, संसारश्च सागरसदृशोऽस्ति, पुरुषश्च काकतुल्योऽस्ति । गजकायसदृशेषु युष्मासु रागवान-हमस्मिन् भवसागरे न मङ्क्ष्यामि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जम्बूकुमारं प्रति पद्मश्रीकथिता वानरकथा ।

अथ पद्मश्रीः प्रोवाच—“ हे नाथ ! त्वमस्मान् परित्यजन् वानर इवात्यन्तं तापं प्राप्स्यसि । तथाहि—एकस्यामटव्यां परस्परमनुरागिणौ वानरो वानरी चास्ताम् । तौ सदा सहैव निवसन्तावभूताम् । वेलन्धरपर्वताविव तौ मिथो बुभुजाते । युगपदेव तौ वृक्षेषु स्पर्धमानाविवारुरुहतुः । एकरज्ज्वाकृष्टाविव युगपद्धावतुः । एकचित्ताविवानिशं सर्वं कार्यं चक्रतुः । एकदा तौ गङ्गातीरवानीरे रेमाते । तत्र वानरः प्लवमानोऽनवधानो भुवि पपात । तस्य तीर्थस्य प्रभावात् स वानरो विद्यावलादिवामरकुमारसदृशो मनुष्यो बभूव । वानरं मनुष्यरूपं दृष्ट्वा वानरी च मनुष्यदेहेच्छुर्वानरमार्गेण प्राणांस्तत्याज । सा वानरी शीघ्रं देवीसदृशी नारी बभूव, नारीभूता सा पुनर्नवीनेन स्नेहेन नरभूतं तमालिलिङ्ग । तौ च नरीभूतौ प्राग्जन्मवदवियुक्तौ निशाचन्द्राविवानिशं विलेसतुश्च ।

एकदा नरीभूतो वानरो नारीमुवाच—“ प्रिये ! यथा प्राङ्मर्त्यीभूतावावां तथा देवीभवावोऽद्य ” । वानरी प्रोवाच—“ स्वामिन् ! भूयसाऽसन्तोषेणालम्, मनुष्यरूपावेवावां सर्वान्, विषयानुपभुञ्ज्वहे, देवत्वेन किं ? देवत्वादधिकं नौ सुखमस्ति, यत एकत्रैव स्वच्छन्दं निर्विघ्नं रमावहे । एवं वानर्या वार्यमाणोऽपि स वानरवरो नरस्तत्रैव वानीरादुच्चैर्झम्पां पूर्ववद् ददौ । तत्र नरीभूतस्तिर्यग्, देवीभूतो मानवश्च यदि पुनः पततः तदा तीर्थप्रभावात् तादृशौ स्याताम् । तस्मात् तत्रैव तीर्थे स पुनरपि झम्पां दत्तवानपि प्राग्जन्मवानरत्वेन भूयोऽपि वानरो बभूव । ततोऽन्येद्युर्भ्रमन्तो राजपुरुषाः पूर्णचन्द्रमुखीं कम्बुकण्ठीं पृथुलस्तनीं कृशोदरीं वरारोहां कमलसदृशहस्तचरणां गङ्गामृत्तिकाविहिततिलकां लताबद्धकेशीं वनकेतकभूषणां तालीदलकुण्डलां कण्ठस्थपद्मनालहारां हरिणाक्षीं तां नारीं ददृशुः । ते राजपुरुषास्तामादाय राज्ञे समर्पयामासुः, यतो यद्वस्तु स्वामिरहितं तिष्ठति तद्राजाधीनं भवतीति नीतिरस्ति । राजा च दिव्याकृतिं तामन्तःपुर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिरोमणिं चकार, यतः सुलक्षणाया आकृतेः शोभाऽतिथितां व्रजति खलु । सोऽपि वानरः कैश्चित्तत्राऽऽगतैर्नटैर्गृहीतः पुत्रवद् विविधं नाट्यं शिक्षितश्च । ते नटा एकदा तस्यैव राज्ञः सन्निधौ समुपेत्य तं वानरं नर्तयन्तः प्रेक्षणीयकं चक्रुः । वानरश्च राज्ञोऽर्धासनोपविष्टां स्वां प्रियां वानरीं दृष्ट्वाऽश्रुपातैः सात्त्विकाभिनयं प्रकटयन्निवाऽऽसीत् । राज्ञी प्रोवाच–" हे वानर ! यः कालो यथा भवति तं तथा सेवस्व, अधुना वञ्जुलपरिभ्रष्टः पतनं मा स्मरः " तस्मात् त्वमपि संप्राप्तं वैषयिकं सुखं परित्यजन् तद्वानरवत् पश्चात्तापं पश्चान्मा कृथाः । " इति पद्मश्रीवचनमाकर्ण्य जम्बूरुवाच–" अहं हि विषयेष्वङ्गारकारकवन्न तृषितोऽस्मि ।

अङ्गारकारककथा ।

तथाहि–कश्चिदङ्गारकारक एकदोष्णर्तौ महाटवीमगात्, जलतृषाशान्त्यर्थं जलं च बहु स्वपार्श्वे निनाय । अङ्गारान् कुर्वन् सोऽङ्गारिको महताऽग्नितापेन सूर्यतापे च तप्तस्तृषाकुलितो बभूव । स वराकः शरीरसेचनेन मुहुर्मुहुः पानेन च स्वपार्श्वस्थितं सर्वं जलं वन्यगजवत् व्यापपार । परञ्च सकलेनापि वारिणा तस्य तृषाग्निस्तैलवल्लेषदपि शशाम । सोऽङ्गारकारको जलं पातुं निपाने यावच्चचाल तावन्मार्गे दैवयोगात् कस्यापि मार्गवृक्षस्याधोऽमृततुल्यशीतलच्छायायां स पिपासुर्निपपात । ततश्च शीतलच्छायया प्राप्तशान्तिः स सुखदां स्वल्पां निद्रां लेभे । स्वप्ने स वापीकूपतडागादीन् सर्वाञ्जलाशयान् मन्त्रप्रयुक्ताऽऽग्नेयबाणवच्छोषयामास; तथाऽप्यच्छिन्नतृषः पिपासाकुलो दीन इतस्ततो भ्रमन्नेकं पङ्किलजलं पूराणकूपं ददर्श । तज्जलं चुलुकैर्ग्रहीतुमसमर्थोऽसौ जिह्वया लिहन् दाहज्वरिवत् कथमपि नातृप्यत् ।

हे प्रियतमे ! तस्माज्जीवोऽयं तदङ्गारकृत्सदृशः, देवव्यन्तरादीनां भोगा वापीकूपतडागादिजलसदृशाः किल सन्ति । यो जीवः स्वर्गादिसुखैर्नातृप्यत् स मानुषैर्भोगैः कथं तृप्येत् ? तस्माद् विषयभोगार्थमाग्रहं न कुरु ।

३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ पद्मसेनोवाच–प्राणिनां परिणामः कर्माधीनस्तस्माद् भोगान् भुङ्क्ष्व, इतरयुक्त्याऽलम् , प्रवर्तकनिवर्तका दृष्टान्ता बहवः सन्ति, यथा नूपुरपण्डिताया गोमायोश्च कथा ।

नूपुरपण्डिताकथा ।

तथाहि–राजगृहे नगरे देवदत्तनामा स्वर्णकारोऽभूत् , तस्य पुत्रो देवदिन्ननामा बभूव । देवदिन्नस्य दुर्गिलानाम्नी भार्याऽभूत् । सा च चतुरास्वेका सौभाग्यमहानिधिश्चाभवत् । एकदा सा कामबाणैः कटाक्षैर्यूनां मनः क्षोभयन्ती नद्यां जलस्नानार्थं गता । सोज्ज्वलवस्त्रैः सर्वाङ्गस्वर्णभूषणैश्च मूर्ता जलदेवतेव भासमाना नदीतीरमलञ्चकार । कामदेवस्य दुर्गभूमिमिव स्तनद्वयं दर्शयन्ती सा पृथुलस्तनी कञ्चुकं शनैः शरीरादुत्तारयामास । सा कञ्चुकं चोत्तरीयं च सख्याः समर्प्य वस्त्रार्धेन कुचौ गोपयामास । निपुणसखीजनालापैर्विदग्धा सा जीवितकामदेवा मरालीव मन्दं मन्दं तटात्तटं विवेश । तां नदीं दूरादप्युत्क्षिप्तैस्तरङ्गहस्तैश्चिरादृष्टां सखीमिव सर्वाङ्गे समालिलिङ्ग । सा चकितहरिणाक्षी जलेन रिरंसुररित्रदण्डाभ्यां नौरिव कराभ्यां जलमदारयत् । कुतूहलात् तस्याश्चिरं स्नान्त्या जलं विकिरन्त्याश्चलौ करौ नृत्यत्कमलविभ्रमौ रेजाते । सा श्लथैकवस्त्रा विलुलितकेशपाशा धवलदन्तावलीका जलक्रीडापरा रतोत्थितेवालक्ष्यत ।

समुद्रे सुरीमिव नद्यां रममाणायां तां पर्यटन् दुःशीलः कोऽपि युवा नागरिको ददर्श । जलार्द्रसूक्ष्मैकवस्त्राच्छादितामपि सुदर्शसर्वावयवां तां दृष्ट्वा स नागरयुवा क्षोभादिदं पपाठ–"सुस्नातमिति नदी ते पृच्छति, अमी वृक्षाश्च पृच्छन्ति, त्वत्पादकमलयोर्निपतन्नहमपि पृच्छामि " । साऽप्यपाठीत्–"नद्यै स्वस्त्यस्तु, वृक्षाश्च चिरं नन्दन्तु, सुस्नातप्रच्छकानां समीहितमहं करिष्यामि । स युवा मनोरथवृक्षोद्भवेऽमृतसेकोपमं तस्या वचनं श्रुत्वा नृपाज्ञयाऽवरुद्ध इव तथैवाऽस्थात् । स केयमिति चिन्तयन्नेकस्य वृक्षस्याध उच्चैर्मुखान् फलपाताभि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काङ्क्षिणो बालानपश्यत् । ततः स युवा लोष्टैस्तरुशाखाः प्रताडयन् फलानि त्रटत्रटेति भूतले पातयामास । स यथेष्टं तत्फललाभहृष्टान् बालानपृच्छत्–" हे बालाः ! नद्यामस्यां स्नानकर्त्री केयमस्ति ? अस्याश्च नार्याः क गृहम् ? " ते बालाः कथयामासुः–" इयं स्वर्णकारस्य देवदत्तनाम्नः स्नुषा वर्तते, अस्यागृहमितोऽतिनिकटे वर्तते, दुर्गिलाऽप्येकचेतसा तं युवानं ध्यायन् स्नानक्रीडां विहाय तत्क्षणे स्वगृहं ययौ ।

कस्यां निशि कस्मिन् दिने क देशे क क्षणे आवां मिलिष्याव इति तौ दिवानिशं चिन्तयामासतुः । वियोगपीडितौ तौ युवानौ परस्परसङ्गमकाङ्क्षिणौ चक्रवाकाविव चिरमनुरागिणावतिष्ठताम् । अन्येद्युः स युवैकां तापसीं पुंश्चलीकुलदेवतां भोजनद्रव्यादिभिः परितोष्य प्रार्थयामास–" हे तापसि ! त्वं देवदत्तस्नुषाया मम च परस्परानुरक्तयोः साक्षान्नियतिदेवतेव शीघ्रं सङ्गमं कारय । हे तापसि ! मया स्वयं दूतीभूय सा सुन्दरी भाषिता, मम सङ्गमं सा स्वीकृतवत्यस्ति, अतस्तव सम्प्रति तत्सङ्गमः सुसाध्योऽस्ति । सा धीमती तापसी तद्वचनं स्वीकृत्य सद्यो देवदत्तस्य गृहं भिक्षाव्याजेन ययौ । स्थालीपरिष्कारे कृतव्यापारां स्वर्णकारवधूं सा परिव्राजिकाऽद्राक्षीत् तामिदं प्रोवाच–" हे वधु ! त्वामेको युवा मूर्तकामदेवो रिरंसुर्मन्मुखेन त्वां प्रार्थयते । हे विशालाक्षि ! मामुदासीनां मा कृथाः, मत्प्रार्थितं सफलीकुरु । रूपेण वयसा बुद्ध्या चातुर्याद्यन्यगुणैश्च स्वानुरूपं तं युवानमासाद्य यौवनं कृतार्थय । हे वधु ! यदवधि त्वामसौ नद्यां स्नान्तीमपश्यत् तदवधि त्वद्गुणोद्गानवातूलोऽन्यस्त्रीनामापि न जानाति " । धीमती दुर्गिलाऽपि निजहृदयभावं गोप्तुं तां तापसीमेवं परुषाक्षरपूर्वकमतर्जयत्–" हे मुण्डे ! त्वं किं मद्यं पीतवत्यसि ? यदेवं प्रलपसि, किं कुलीनेषु जनेष्वकुलीना कुट्टिन्यसि ?, आस्त्वं मम नेत्रयोरग्रे त्यज, लुब्धवदर्शना भव, तव दर्शनेनापि पापं, भाषणेन का कथा ? " एवं निर्भर्त्सितायाः गच्छन्त्यास्तापस्याः पृष्ठे दुर्गिला

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सौधकुड्य इव मषीमलिनकरं ददौ । तदाशयमजानाना सा विलक्षा तपस्विनी दुःशीलपुरुषं गत्वा परुषाक्षरैरुवाच–" हे दुःशीलपुरुष ! त्वं मां मिथ्यैवमवादीर्यन्मय्यनुरागिणी साऽस्ति ।" सा हि विशालसतीगर्वा मां शुनीमिवातर्जयत् । हे मुग्ध ! मम दूत्यं तस्यां कुलाङ्गनायां व्यर्थमभूत् , यतः सुभित्तौ चित्ररचना चतुरस्य शोभते । गृहकर्मव्यग्रया कुपितया तया मषीमलिनकरेण चपेटया पृष्ठेऽहमाहताऽस्मि " इत्युक्त्वा सा तापसी दुर्गिलादत्तमषीमलिनकराङ्कितं स्वपृष्ठं धूर्तवरायादर्शयत् । तदा स एवं व्यचारयत्–" कृष्णपञ्चम्यां ध्रुवं सा सङ्केतमदात् , यदस्याः पृष्ठे पञ्चाङ्गुलिर्मषीहस्तो न्यस्तः, अहो तस्याश्चातुरी काऽप्यपूर्वा या सङ्केतवासरं सूचयति । हे मनो ! ऽनया भङ्ग्याऽऽश्वसिहि; अहो सा सङ्केतस्थानं तु केनापि हेतुना न सूचयाञ्चक्रे । तद्यापि तत्सङ्गमे विघ्नो वर्तते । पुनश्च स तापसीमुवाच–" हे तापसि ! तस्या आशयं त्वं न जानासि । सा मय्यनुरागिण्येवातो भूयोऽपि तां प्रार्थय । हे मातः ! मत्प्रयोजने सर्वथाऽनुत्साहं मा कृथाः । भूयोऽपि त्वं गच्छ । यत उत्साहो लक्ष्मीलताया आदिमं मूलमस्ति " । साऽपि जगाद–" सा कुलीना तव नामापि न सहते । स्थले जलारोपणमिव तवेप्सितं दुष्करं प्रतिभाति । त्वदर्थसिद्धिस्तु संदिग्धा, मम भर्त्सनं तु निःसंदिग्धमेव । तथापि ह्यनाशां त्यक्त्वा शीघ्रं यास्यामि " इत्युक्त्वा तापसी पुनरपि दुर्गिलां गत्वाऽमृतद्रवसदृशैर्वचनैरुवाच–" हे दुर्गिले ! रूपेणाऽऽत्मानुरूपं तं युवानं प्राप्य तेन रमस्व । यौवनफलं गृहाण । यतो यौवनस्येदं फलमस्ति " दुर्गिला तां तापसीं भर्त्सनापूर्वकं गले धृत्वा रुष्टेवाशोकवनिका-प्रत्यग्द्वारेण निःसारयामास । सा तापसी लज्जावशाकृष्टोत्तरीया गोपितमुखी खेदभाग् द्रुतं गत्वा तस्य पुंसो दुर्गिलावृत्तं कथयामास " हे पुमन् ! अहं तया प्राग्वद् भर्त्सिता गले धृता पश्चाद्द्वाराऽशोकवनान्तरान्निःसारिताऽस्मि । ततो धीमान् स पुमानेवं दध्यौ–" अशोक-वनिकान्तरे त्वमागच्छेरिति सङ्केतस्तया दत्तो मम " । तामुवाच–" हे तापसि ! तया भर्त्सना कृता सा सोढव्या । अतः परं सा दुष्टा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वया न किमपि वाच्या "। ततः स युवा कृष्णपञ्चम्यां सायंकालेऽशोकवनिकान्तरे पश्चिमद्वारेण जगाम । स युवा मार्गं पश्यन्तीं तामपश्यत्, साऽपि तमद्राक्षीत् । तयोर्विवाहवदस्खलितस्तारामेलकोऽभूत् । नयने इव परस्परं बाहू प्रसारयन्तौ तौ द्वौ रोमाञ्चोत्फुल्ल-सर्वाङ्गावधावताम् । तौ प्रागप्येकचित्तौ तदा त्वेकीभवत्कायौ समुद्रनद्याविव दृढतरमालिलिङ्गतुः । प्रेमगर्भाभिर्वार्ताभिर्नवनवैः रतैः संभोगसमुद्रनिमग्नौ तौ रात्रेर्यामद्वयमतिनिन्यतुः । रताऽऽयासशालिनोर्भुजगण्डोपधानयोस्तयोर्नयनकमलनिशा निद्रा संचक्राम ।

इतश्च देवदत्तनामा स्वर्णकारः कायचिन्तार्थमुत्थितोऽशोकवनिकां ययौ । तौ शयानौ दृष्ट्वाऽचिन्तयच्च–" इयं मम स्नुषा पापीयसी तां धिक् यदियं परपुंसा सह रतश्रान्ता नितान्तं स्वपिति "। स वृद्धो जारश्चायमिति निश्चेतुं गृहं गत्वा सुप्तं पुत्रं दृष्ट्वेति व्यचारयत्–" एतस्याश्चरणनूपुरमाकर्षामि शनैः, यथा मे पुत्रो विश्वसिति यदियं स्नुषाऽसती विद्यते " इति ध्यात्वा चौर इव सद्यस्तत्पादनूपुरं शनैराकृष्य देवदत्तस्तेनैव मार्गेण स्वगृहमाययौ । सा स्वर्णकारस्नुषा पादनूपुराऽऽकर्षणेनाजागरीत् । प्रायः सभयसुप्तानां निद्रा स्वल्पैव भयादिव भवति । साऽपि श्वशुरेणाऽऽकृष्टं पादनूपुरं ज्ञात्वा जारपुरुषमुत्थाप्य भयव्यग्रा जगाद–" शीघ्रं पलायस्व, यत आवां दुरात्मना श्वशुरेण दृष्टौ स्वः, ममानर्थे समागते सहायतायै त्वं यतेथाः " स जार आमित्युक्त्वाऽर्धसंवीतवस्त्रो भयात् पलायाञ्चक्रे । पुंश्चल्यपि सा शीघ्रं गृहे गत्वा भर्तृपार्श्वेऽशेत। सा धृष्टतां नाटयन्ती बुद्धिमतीनां धुरन्धरा गाढाऽऽलिङ्गनपूर्वकं स्वपतिं प्रबोधयाञ्चकार, पतिं चोवाच सा–" हे नाथ ! इह मां घर्मो बाधते, तत्पवनान्दोलितपल्लवामशोकवनिकामितश्चल । " स देवदिन्नोऽपि स्त्रीप्रधान उत्थाय सरलत्वा-दशोकवनिकां गत्वा कण्ठलग्नया दुर्गिलया सह जारस्थानेऽशेत । साऽपि तत्रैव निर्भरमालिङ्ग्याशेत । तत्पतिस्तत्रापि सरलाशयो निद्रां प्राप, यतोऽक्षुद्रमनसां निद्रा सुलभैव भवति । अथ सा धूर्ता नटीव गोपिताऽऽकारा पतिमुवाच—" हे नाथ ! त्वत्कुले कोऽयमाचारो,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यो वक्तुमपि न शक्यते । त्वामालिङ्ग्य प्रसुप्ताया आवरणरहितवक्षसो मे पादात् तव तातो नूपुरमाकृष्याग्रहीत् । पूज्यानां वध्वाः स्पर्शोऽपि नोचितः, रतवेश्मनि पत्या सह प्रसुप्तायास्तस्याः का कथा ? " । " हे मनस्विनि ! प्रातरहं सोपालम्भं पितरं वक्ष्यामि त्वत्समक्षे " इति दुर्गिलां देवदिन्न आश्वासयामास । दुर्गिलोवाच–" अधुनैव त्वं पितरं कथयितुमर्हसि, अन्यथा प्रातर्मां परपुरुषेण शयितां कथयिष्यति । सोऽप्युवाच–" मम सुप्तस्य वध्वाः पादनूपुरमहार्षीदित्यहं पितरमाक्षिप्य वक्ष्यामि ; तव पक्षेऽस्मि, किल त्वं निश्चिन्ता भव " । हे नाथ ! यथाऽधुना त्वं वदसि तथा प्रातरपि कथयेः " सा धूर्तेति स्वपतिं बहून्छपथान् कारयामास ।

ततः प्रभाते देवदिन्नः कुपितः स्वपितरं जगाद–" त्वं किं मम स्त्रियाः पादनूपुरमकर्षः । " स वृद्ध उवाच–" हे पुत्र ! इयं वधूः दुःशीलाऽस्ति मयाऽशोकवने रात्रौ परपुरुषेण शयिना निरैक्षि, इयं दुःशीलेति तव विश्वासार्थमस्याः पादान्नूपुरमाकर्षम् , " तदा पुत्र उवाच–" हे पित ! स्तत्राहं सुप्तोऽपरः कोऽपि पुरुषो न शयितोऽभूत् । निर्लज्जेन त्वया किमीदृशं लज्जितोऽस्मि । वध्वा नूपुरमर्पय त्वं न विगोपय तत् , मयि सुप्ते तत्त्वयाऽऽकृष्टं ममेयं स्त्री प्रकृष्टा सती वर्तते खलु । " स्थविर उवाच–" यदाऽहमस्या नूपुरमाकर्षं तदा गृहमागत्य त्वामपश्यम् , त्वं गृहे शयित आसीः किल । " ततो दुर्गिलोवाच–" अहं स्वस्य दोषाऽऽरोपणं न सहे, दैवीं क्रियां कृत्वा पितरं प्रत्याययिष्यामि । मम कुलीनाया ईदृशं दोषाऽऽरोपणं वाङ्मात्रमपि न शोभते यथा धौतधवलवस्त्रे मषीबिन्दुः । इह शोभनयक्षस्य जङ्घाभ्यन्तरे निःसराम्यहम् , यत्तज्जङ्घयोर्मध्येऽशुद्धो न गन्तुं शक्नोति ।

अथ सविकल्पेन पित्रा निर्विकल्पेन पुत्रेण प्रागल्भ्यमहानिधेस्तस्याः प्रतिज्ञा स्वीचक्रे । सा स्नात्वा धौतवस्त्रधरा धूपपुष्पोपहारपाणिः सर्वबन्धुसमक्षं यक्षं पूजयितुं जगाम । सङ्केतितः स जारः यक्षमर्चयन्त्यास्तस्याः कण्ठदेशे कवर्गवद् ग्रहिलीभूयालगत् । जनैः स ग्रहिल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति गले धृत्वा दूरेऽपास्यत । सा पुनः स्नात्वा यक्षमर्चित्वैवं व्यजिज्ञपत्–“ चेन्मया पतिं विना मत्कण्ठे प्रत्यक्षममुं ग्रहिलं च विना कदापि नान्यः पुमानस्पर्शि तदा मे शुद्धिदो भूयाः, यतः सत्याः सत्यप्रियोऽसि ” किं करोमीति चिन्तया यावद्यक्षोऽप्याविष्टस्तावत् तज्जङ्घयोर्मध्ये साऽविलम्बेन निर्जगाम । शुद्धा शुद्धेति तुमुलकारिणि जने तस्या गले राजाध्यक्षाः पुष्पमाल्यं निचिक्षिपुः । वाद्यमानेन तुर्येण प्रमुदितबन्धुभिर्वृता सा देवदित्तेन स्वीकृता श्वशुरगृहं ययौ । स्वकं नूपुराकर्षणजनितं कलङ्कमुदतारयत्, तत्प्रभृति जनैर्नूपुरपण्डिताऽकथ्यत ।

“ स्नुषया मत्या पराजितो देवदत्तस्तत्प्रभृति चिन्तया नष्टनिद्रो वारिबद्धगज इवाभवत् । राजा तं योगिनमिवानिद्रं ज्ञात्वा यथाप्रार्थितां जीविकां दत्त्वा शुद्धान्तरक्षकं चकार । कस्यांचिन्निश्येका राज्ञी तमन्तःपुररक्षकं शेते नवेति ज्ञातुं पुनःपुनरपश्यत् । सोऽचिन्तयत्–“ किमपि कारणं मया न ज्ञायते यदुत्थाय मामेषा पुनःपुनर्निरीक्षते ” । मयि सुप्ते किमियं कुर्यादिति ज्ञातुं स यामिकः कपटनिद्रया शिश्ये । शनैश्चौरवद् गवाक्षाभिमुखं गन्तुमारेभे तस्य गवाक्षस्याधो देवराजगजसोदरो राजप्रियः सदामदो हस्ती निबद्ध आसीत् । सा तस्य गजस्य हस्तिपके नित्यानुरागिणी गवाक्षतः सञ्चारिदारुफलकमपसार्य बहिर्ययौ । नित्याभ्यासात् सुशिक्षितो गजः शुण्डेन तामादाय भूमौ मुमोच । ततस्तां दृष्ट्वा हस्तिपकोऽकुप्यत् । पुनः सोऽतिकाले किमायासीरित्युक्त्वाऽरुणेक्षणो हस्तिशृङ्खलया दासीमिव तां जघान । सोवाच--“ हे हस्तिपक ! मां मा ताडय, अद्य, राज्ञा मुक्तः कोऽपि नवोऽन्तःपुररक्षको जागरूकः सन् मामवारुधत् । हे सुन्दर ! अहं कथमपि तस्य निद्राच्छिद्रं प्राप्याऽऽगताऽस्मि–” इति विज्ञाय मा कोपीः,” इत्थं तया बोधितो हस्तिपकः कोपं त्यक्त्वा तया सह यथारुचि रेमे । रात्रेः पश्चिमे भागे साहसमहानिधिः सा हस्तिना शुण्डमारोप्योदञ्चिता स्वाऽऽवासं ययौ । स्वर्णकारोऽपि दध्यौ–“ अहो स्त्रियां चरितं घोटकानां कुहकारावमिव को ज्ञातुमर्हति ? । अहो यद्यसूर्यम्पश्यानामपि राजयोषितामेवं शीलभङ्गो भवति तर्ह्यन्यस्त्रीषु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

का कथा ?, सामान्यगृहस्त्रीणां जलाहरणार्थं सञ्चरन्तीनां शीलरक्षणं कियच्चिरं भवितुमर्हति ? ” इति स्वस्नुषाया दौःशील्यकोपचिन्तां त्यक्त्वा शोषितर्णोऽधमर्ण इव तत्र निर्भरं सुष्वाप । स स्थविरः स्वर्णकारः प्रातरपि न जागराञ्चक्रे । ततो भृत्यास्तं तथास्थं राज्ञेऽकथयत् । राजाऽपि प्रोवाच–“ केनापि कारणेनात्र भवितव्यम्, तस्मादसौ यदा जागृयात्तदा तं मत्पार्श्वे समानयत । ” इत्यादिष्टा भृत्या ययुः । स्वर्णकारोऽपि चिरात् सप्तरात्रं निद्रासुखमन्वभूत् । सप्तरात्रे व्यतीते सोऽजागरीद् भृत्यैश्च स राजसमीपं नीतः । राज्ञैवमपृच्छयत–“ हे स्थविर ! तव तु निद्रा कदापि नाऽऽगमत् यथा दुर्भगस्य कामिनी नैति तथा, तत् किं सप्तरात्रं त्वं सुप्तः ?, तव न किमपि भयं यथार्थं ब्रूहि, सोऽपि हस्तिपकस्य राज्या गजस्य च रात्रिवृत्तान्तं यथादृष्टं राज्ञेऽचकथत् । ततो राज्ञा प्रसादं दत्त्वा स विसृष्टो निजगृहं ययौ । ततो जीर्णदुःखः सुखपूर्वकमतिष्ठत्, यतो जनो धैर्यं जनात् प्राप्नोति । ततो राज्ञा तां दुश्चारिणीं ज्ञातुं काष्ठहस्तिनं कारयित्वा सर्वा राज्ञीराज्ञापयत्, मया स्वप्नो दृष्टो यत् कैलश्चोऽयं मत्तङ्गजः स भवतीभिर्ममाग्रे विवस्त्राभिरारोढव्यः । ता राज्यो राज्ञः पश्यतस्तथा चक्रिरे । परं चैका राज्ञी त्वेवमुवाच–“ हे नाथ ! अहमस्माद् गजाद् बिभेमि ” । ततो राजा कुपितः तां राज्ञीं लीलाकमलनालेनाताडयत् । सा मूर्च्छानाटितकं कृत्वा भूमावपप्तत् । नृपोऽप्येवं दध्यौ –या स्थविरेणोक्ता सेयं कुलपांसिनी पापीयसी दुश्चारिणी मम राज्ञी वर्तते । तत्पृष्ठं निरूपयञ्छृङ्खलाघातदर्शनात् स्मयमानो नखाच्छोटनिकापूर्वकमिदमुवाच स राजा–“ हे दुश्चरिते ! त्वं गजेन क्रीडसि, अस्माद् दारुहस्तिनो बिभेषि, पुनस्त्वं शृङ्खलाघातान्मोदसे कमलघातान्मूर्च्छसि च । राजा प्रदीप्तकोपप्राग्भारो वैभारगिरौ गत्वा तं हस्तिपकं हस्त्यारूढमाजूहवत् । ततस्तेन सह तां राज्ञीं गजासने समारोपयत् । उग्रशासनो राजा तं हस्तिपकाधमं समादिशत्–“ गजं विषमगिरिप्रदेशारूढं कृत्वा निपातयेः, तेन युवयोर्निग्रहो भवतु ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आधोरणस्तं हस्तिनं पर्वतशिखरे त्रिपद्योरिक्षप्तैकपादं स्थिरं धारयामास । तदा जनो हाहाकुर्वन्नुवाच–“ राजशिरोमणे ! आज्ञाकारिणः यशोर्गजेन्द्रस्य मारणं नोचितं भवति ” । अनाकर्णितकं कृत्वा पातयेत्येवोपदिशति राज्ञि हस्तिपको गजं द्वाभ्यां पद्भ्यामधारयत् । पुनर्लोके “ हाहाऽयं गजो न हन्तव्य ” इति वदति सति राजा तूष्णीकोऽभूत् । हस्तिपकश्च तं गजमेकपादस्थं दधौ । लोको हस्तिरत्नस्य मारणं द्रष्टुमसमर्थो हाहाकुर्वन्नुर्ध्वस्थितैर्भुजै राजानमुवाच–“ हे क्षितिवल्लभ ! अयमन्यगजासह्यः सुशिक्षितो दक्षिणावर्तवद् दुष्प्रापो वालनीयोऽस्ति, ” राजं ! त्वं प्रभुरसि तस्मादपराधिनोर्यदिच्छसि तत् करोषि; परन्त्वविवेकजमयशस्तव निरङ्कुशं स्यादिति विद्धि । हे स्वामिं ! त्वया स्वयं कार्याकार्ये विचार्ये, तत् स्वयं विचार्य हस्तिरत्नं रक्ष, नः प्रसीद । राजाऽप्युवाच–“ अस्त्वेवम् यूयं सर्वे मद्वचसेमं हस्तिपकं हस्तिरक्षणाय वदत ” । ततो लोका ऊचुः–“ हे आधोरणशिरोमणे ! इयतीं भूमिकां प्रापितं गजं निवर्तयितुं त्वं शक्नोषि ? स उवाच–“ यदि राजाऽऽवयोरभयं ददाति तदा सुखेनोत्तारयामि ” । तदा राजलोकैर्विज्ञप्तः–“ हे राजन् ! अनयोरभयं देहि । ततो हस्तिपकः शनैस्तं गजमुदतारयत्। ततो गजस्कन्धाद् राज्ञी-हस्तिपकावुत्तीर्णौ । मद्देशस्त्यज्यतामित्युक्तौ तो पलायाञ्चक्राते ।

तौ नश्यन्तौ सायंकाल एकं ग्रामं जग्मतुः । तत्रैकस्मिञ्छून्ये देवालये सहैव सुषुपतुः । एकश्चौरो ग्रामादर्धरात्रे तदारक्षकेभ्यो नंष्ट्वा तद्देवकुले प्राविशत् । तद्देवकुलं ग्रामारक्षकाः प्रातर्वयं चौरं ग्रहीष्याम इति वदन्तः पर्यवेष्टयन् । चौरोऽप्यन्धवत् कराभ्यां देवकुलं शोधयन् यत्र तौ शयानौ बभूवतुस्तत्र शनैर्ययौ । तस्करेण स्पृश्यमानोऽपि न हस्तिपकोऽजागरीत्, यतः श्रान्तस्य निद्रा वज्रलेपवत् सज्यते । परं चेषत्करस्पृष्टाऽपि राज्ञी शीघ्रमजागरीत् । तस्मिंश्चौरे स्पर्शमात्रादनुरागिणी भूता सा त्वं कोऽसीत्युवाच च शनैः । सोऽपि तस्करः शनैरित्युवाच–“ अहं चौरोऽस्मि ” अहं धावत्सु ग्रामरक्षकेषु प्राणत्राणार्थमत्र प्राविशम् । सानुरागासतीब्रुवा सा चौरमब्रवीत्–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

“ हे सुभग ! यदि मामिच्छसि तदा त्वं रक्षामि नात्र संशयः । ” चौर उवाच–“ हे वरवर्णिनि ! मया कनकं सुगन्धश्च प्राप्तौ यतो मम पत्नी भवसि जीवितं च रक्षसि । परं कोऽत्र प्रकारो येन मां रक्षसि तत् कथयित्वा हे धीमति ! मामाश्वासय । ” सा प्रोवाच–“ हे सुभग ! ग्रामरक्षकेष्वागतेषु त्वां पतिं वक्ष्यामि ” सोऽब्रवीत्–“ एवमस्त्विति ” । तदा प्रातःकाले शस्त्रपाणिभिः प्रविष्टैर्भ्रूभङ्गभीषणैर्ग्रामसुभटैस्त्रयोऽपि पृष्टाः–“ युष्मासु कश्चौर इति ” । ततः सा धूर्ता मूर्तमायेव तान् ग्रामपुरुषानुवाच “ चौरपुरुषमुद्दिश्याऽयं मे पतिरिति ” सा कृताञ्जलिः पुनरुवाच–“ हे भ्रातरः ! आवां ग्रामान्तरे गच्छन्तौ दिनापगमेऽत्र देवालये न्यवात्स्व ” । ते ग्रामीणाः सम्भूय पर्यालोच्यैवमूचुः–“ चौरस्य गृहे ईदृशं स्त्रीरत्नं न संभाव्यते । इयं ब्राह्मणी वाणिजी राजकन्या वा काऽप्यन्या भवेत् । इयं मूर्त्याऽपि पवित्रा, अस्याः पतिश्चौरो न भवेत् । इयं विचित्रवस्त्रभूषणा लक्ष्मीरिव वपुष्मती, यस्येयं स्त्री स चौर्येण न जीवितुमर्हति । पारिशेष्याद् हस्तिपकमेव दोषिणं मत्वा सद्यः शूलायां समारोपयाञ्चक्रुः । शूलाधिरोपितः स हस्तिपको मार्गे यं यं ददर्श तं तं मां जलं पायय पाययेति प्रार्थयामास । तं राजभीत्या कोऽपि जलं नापाययत् । यतः सर्वोऽपि स्वरक्षापूर्वकं धर्ममाचरति । तदा तेन मार्गेण गच्छन् जिनदासाख्यः श्रावकस्तेन चौरेण दृष्टो जलं याचितश्च । सोऽपि तं प्रत्येवमुवाच–“ हे चौर ! तव पिपासामहं हरिष्यामि यदि मद्वचः करिष्यसि ” । तावत् त्वं ‘ नमोऽर्हद्भ्य इति वदे यावदहं जलमानयामि । जलपिपासया स हस्तिपकस्तथा घोषयितुं प्रारेभे । ततः स श्रावकोऽपि तत् पिपासाशान्त्यर्थं राजपुरुषाऽऽज्ञया जलमानयत् । स हस्तिपक आनीयमानं जलं दृष्ट्वा नमोऽर्हद्भ्य इति समुच्चरन् प्राणैरमुच्यत । स त्वसंश्रुतशीलोऽपि शीलिनाकामनिर्जरो नमस्कारप्रभावेण व्यन्तरदेवोऽभूत् ।

साऽपि पुंश्चली चौरेण सह मार्गे प्रययौ । मार्गे एकां नदीं जलपूरेण दुस्तरां प्राप । चौरोऽपि पुंश्चलीं प्रत्युवाच–“ त्वामहमेक–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समयेनोत्तारयितुं न शक्नोमि यतस्ते वस्त्राभरणभारोऽस्ति । हे प्रिये ! प्रथमं त्वं वस्त्राभरणभारं मह्यं समर्पय । तं प्राग् नदीपारं नेष्यामि, ततस्त्वामप्यनायासेन पारं नेष्यामि । यावदहमायामि तावत् त्वं शरस्तम्बे तिरोभव, एकाकिन्यपि मा भैषीरहं शीघ्रमेष्यामि, तदा त्वां पृष्ठदेशे आरोप्य जले तरन् पोत इव परस्मिंस्तटे नेष्यामि । त्वं मद्वचनं कुरु " शरस्तम्बे प्रविश्य सा पुंश्चल्यपि तथा चकार । स चौरो वस्त्राभरणानि नीत्वा परं तटं गत्वेत्यचिन्तयत्–" येयं पतिं मारयामास सा मय्यनुरक्ता क्षणरागा हरिद्रेव ममाप्यसौ विपदेऽवश्यं स्यात्, इति वस्त्राभरणानि गृहीत्वा स तस्करो वलत्कन्धरः पश्यन्नपि हरिणवन्ननाश । उद्धतकरा हस्तिनीव सद्योजातेव नग्ना सा गच्छन्तं तमालोक्योवाच–" हे प्रिय ! मां विहाय किं यासि ? " । चौरोऽवदत्–" त्वामेकाकिनीं शरवणस्थितां राक्षसीमिव दृष्ट्वा बिभेमि, अतस्त्वयाऽलम् " एवं वदन् स पक्षीवोड्डीयानश्यत् । सा पुंश्चली पतिद्वेषिणी तत्रैवोपविश्य तस्थौ ।

स हस्तिपकजीवोऽपि देवत्वं प्राप्तः प्रयुक्तावधिज्ञानस्तां तपस्विनीं तथास्थितामपश्यत् । ततः स तां पूर्वजन्मस्त्रियं संबुबोधयिषुर्मुखाद् गृहीतमांसखण्डं शृगालं विचकार । इतश्च स तस्या नद्यास्तटे जलाद्बहिःस्थितं मत्स्यं भोक्तुं मांसपिण्डं त्यक्त्वाऽधावत्; तदा मीनः पुनरपि नदीनीरं प्राविशत् । तद्विकृतपक्षिण्या मांसपिण्डमग्रहीत् ।

ततः सा नग्निका शरवणोपविष्टा दुःखदीनाऽपि दृष्टकौतुका तं जम्बूकमुवाच–" हे शृगाल ! दुर्मते ! मांसपेशीं विहाय मीनं त्वमीहसे मीनान्मांसाच्च भ्रष्टः सन् किं त्वं पश्यसि ? । जम्बूक उवाच–" हे नग्निके ! त्वं निजपतिं त्यक्त्वा पत्युर्जाराच्च भ्रष्टा सती किं पश्यसि ? । तच्छ्रुत्वा सुष्टु बिभ्यत्यास्तस्याः स व्यन्तरदेवो महर्द्धिकं स्वं रूपं दर्शयित्वैवमवोचत्–" हे पापे ! यद्यपि त्वं पापमेवाकृथास्तथापि पापपङ्कजलप्लवं जिनधर्मं समाश्रयेः । हे मुग्धे ! यो हस्तिकस्त्वया मारितः सोऽहमस्मि, जिनधर्मप्रभावात् देवत्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्तोऽस्मि; मां पश्य । ततोऽहमपि जिनधर्मं प्रपत्स्य इति कृतनिर्णयां तां स साध्वीसन्निधौ नीत्वा परिव्रज्यामग्राहयत् ।

तस्मादस्मादृग्जनायोग्यान् प्रवर्तकनिवर्तकान् दृष्टान्ताननादृत्य त्वं वैषयिकं सुखं भुङ्क्ष्व । ततो जम्बूनामाऽपि जगाद–" अहं विद्युन्माली खेचर इव रागग्रहिलो नास्मि; तस्य चरितं त्वं शृणु तथाहि—

विद्युन्मालिकथा ।

इह भरतक्षेत्रे पक्षाभ्यां पक्षीव भरतार्धाभ्यां सम्पृक्तो वैताढ्यनामकः पर्वतोऽस्ति । तत्रोत्तरश्रेणिभूषणं गगनवल्लभनामकं पुरवरमस्ति यद्देवानामतिप्रियं विराजते । तस्मिन् पुरे मेघरथो विद्युन्माली चेति नामतो द्वौ प्रीतिमन्तौ तरुणौ विद्याधरौ सोदरावभूताम् । तौ विद्यां साधयितुं मन्त्रयामासतुः । भूगोचरसमीपे यामस्तत्रैवावयोर्विद्या सेत्स्यति । तद्विद्यासाधनेऽयं विधिर्यत्–अतिनीचकुलजाता कन्या विवाह्या, ततो वर्षपर्यन्तं ब्रह्मचर्यं पालनीयमिति । ततो गुरूननुज्ञाप्यात्र दक्षिणे भरतार्धे द्वावपि तौ वसन्तपुरनगरमाजग्मतुः । ततश्चाण्डालाऽऽवासं चाण्डालवेषेण गत्वा तौ बुद्धिप्रभावेण चाण्डालमाराधयाञ्चक्राते । ततश्चाण्डाला आराधिताः प्रसन्नाः सन्तः प्रोचुर्युवयोश्चिरागतयोः किमत्र प्रयोजनमस्ति ? तत्कथयतम् । तौ सद्भावं गोपयित्वोचतुः–" हे हिताः ! आवां क्षितिप्रतिष्ठनगरादागतौ स्वः, आवां पितृभ्यां हि कुटुम्ब-मध्याद् बहिष्कृतौ, इति हेतोः क्रोधेन निर्यन्तौ भ्रमन्ताविहागतौ स्वः " । ततश्चाण्डाला ऊचुः–" युवामस्मत्कन्ये परिणेष्यथस्तदाऽस्मत्कुलोचितं सर्वं करिष्यथ, " तावुचतुः–" आम् " इति । ततो मातङ्गास्ताभ्यां द्वे कन्ये काणदन्तुरे प्रादुः । विद्युन्माली तु कुरूपायामपि कन्यायां रक्तोऽभूत्, न विद्यामसाधयच्च । क्रमेण विद्युन्मालिभार्या गर्भवत्यभूत्, पूर्णे गर्भे च मेघरथो विद्यां साधयित्वा सिद्धविद्योऽजनि । ततो मेघरथो भ्रातृस्नेहाद् विद्युन्मालिनमुवाच–" हे भ्रातः ! वयं सिद्धविद्याः स्मः, चाण्डालकुलं त्यज । वैताढ्यसुखसम्पद्योग्यौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवावः, अतस्त्वं चाण्डालकन्यां त्यज । वैताढ्ये खेचर्यः स्वयंवरा भाविन्यः सन्ति ।" सलज्जो विद्युन्माल्यवदत्–"हे सुव्रत ! त्वं सिद्धविद्योऽस्यतो कृतकृत्यः सन् वैताढ्यं याहि । अहं तु नियमपादपं भग्नवांस्ततोऽधमः कथं नियमतरुजन्यं विद्यासिद्धिफलं प्राप्नुयाम् । हेऽनघ ! इमां वराकीं जातगर्भां त्यक्तुं नाहं शक्नोमि । पुनरसिद्धविद्योऽहं त्वया सह गन्तुं जिह्रेमि । त्वं साधितविद्यो याहि, अहं पुनरसाधितविद्यो बन्धूनां मुखं कथं दर्शयिष्यामि ? । अमुना प्रमत्तेन मयाऽऽत्मनैवाऽऽत्मा वञ्चितः अहमिदानीमुद्योगतत्परो विद्यां साधयिष्यामि, त्वं मां भ्रातरं हृदि धारयन् वर्षान्ते पुनरिहाऽऽगच्छेः, तदा त्वया सह साधितविद्योऽहं यामि ।" ततो मेघरथश्चाण्डालीप्रेमपाशबद्धं विद्युन्मालिनं नेतुमशक्त एकाक्यपि वैताढ्यगिरिं ययौ । तत्र बन्धुभिः स पृष्टः–"त्वमेकाकी किं समागतोऽसि ? तव भ्राता क्वास्ति ?" इति श्रुत्वा प्रोवाचासौ विद्युन्मालिवृत्तान्तमादितः ।

अवसरे विद्युन्मालिनः सा चाण्डाली प्रिया पुत्रमजीजनत् । स विद्यासिद्धिमिव तां प्राप्यामोदत । स कुबुद्धिस्तस्यां म्लेच्छयां परमप्रेम्णाऽऽसक्त्या च विद्याधरसुखं व्यस्मरत् । सा काणदन्तुरा चाण्डाली विद्युन्मालिना सह यथासुखं क्रीडन्ती पुनरपि गर्भं दधौ ।

इतश्च विद्यासम्पन्नो मेघरथस्तत्र वर्षान्ते जगाम भ्रातृस्नेहवशात् । सोऽचिन्तयदेवम्–"अहं स्वर्गाङ्गनासदृशविद्याधरवधूवृतोऽस्मि । स मे भ्राता काणदन्तुरम्लेच्छीगार्हस्थ्यनरके स्थितः । अहं पुनः सप्तभूमे प्रासादे उद्यानशोभिते निवसामि, स तु श्मशानास्थिव्याप्ते चाण्डालकुटीरके वसति । अहं नानाविधविद्यर्द्धिभिः सिध्यमानमनोरथोऽस्मि, स तु जीर्णवस्त्रधारी कदन्नभुक् चास्ति ।" एवं विद्युन्मालिनि सौभ्रात्रानुरूपं चिन्तयन् मेघरथो वसन्तपुरपत्तनं जगाम । तत्र गत्वा भ्रातरमुवाच–"हे भ्रात ! त्वं वैताढ्यगिरौ विद्याधरसुखैश्वर्यं महत्तरं कथं न भुङ्क्षे ?" ततो विद्युन्माली विलक्षं हसित्वेदमूचे–"हे भ्रातः ! इयं पत्नी मम बालवत्सा पुनर्गर्भवती

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्यते, तस्मादिमामनन्यशरणां सपुत्रां गुर्विणीं वज्रहृदयस्त्वमिव नाहं त्यक्तुं शक्नोमि । हे भ्रातस्तमाद् गच्छ अन्यदा दर्शनं दद्याः, अहममुं समयमत्रैव यापयिष्यामि त्वं मा क्रुध्य ।" ततो मेघरथस्तं प्रबोधं प्रबोधमतिखिन्नः पुनस्ततो निरगमत्; यतोऽतिजडे नरे हितोऽपि जनः किं कर्तुं शक्नुयात् ? ।

अथ विद्युन्माल्यपि द्वितीये पुत्रे जाते चाण्डालकुलं स्वर्गादप्यधिकं मुदाऽमन्यत । वस्त्रभोज्यादिदौःस्थ्येऽपि स दुःखं न विदाञ्चकार । तौ चाण्डालीकुक्षिभवौ बालौ सलीलमुदलालयत् । स ताभ्यां क्रोडस्थाभ्यां पुनः पुनर्मूत्रयद्भ्यां गन्धोदकस्नानमिव मूत्रस्नानममन्यत । तं म्लेच्छ्यपि सुभगंमन्या पदे पदे ततर्ज; तथापि तदासक्तः स चाण्डालकुलकिङ्करो बभूव ।

मेघरथः पुनर्भ्रातृस्नेहवशादागत्य गद्गदया वाचा विद्युन्मालिनमालिङ्ग्य जगाद—" हे कुलीन ! त्वं चाण्डालकुले मा तिष्ठ, तवात्र काऽऽस्था ? । हंसो मानसोत्पन्नः किं गृहस्रोतसि रमते ? । यत्र कुले त्वमुत्पन्नोऽसि तत्कुलं न मलिनीकुरु । यथा धूमेनाग्निस्तथा त्वमनेन दुराचारेण मलिनो जातः ।" एवं प्रबोध्यमानोऽपि स नागन्तुमैच्छत् । ततो मेघरथो नाहमत्र पुनरागमिष्यामीत्युक्त्वा ततोऽगमत् ।

अथ मेघरथः पैत्र्यं राज्यं चिरमपालयत् । एवं मेघरथो बुद्धिमान् सुखराशिं लेभे, विद्युन्माली तु भवसागरे बभ्राम । हे पद्मसेने ! विद्युन्मालीवोत्तरोत्तरसौख्यातिलम्पटो रागान्धो न भविष्यामि । ततः कनकसेनोवाच—" हे स्वामिन् ! किञ्चिन्मामपि मानय । शङ्खधमक इव त्वमतिशयं न कुरु । तथाहि—

शङ्खधमककथा ।

शालिग्रामे कश्चिदेकः कृषीवलो बभूव । स प्रातरारभ्य सायं यावन्नित्यं क्षेत्रं ररक्ष । स क्षेत्रसमुद्रे मञ्चपोतमारूढः शङ्खशब्देन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दूरादागच्छतः सत्त्वान् पलाययामास । एकदा चौरा गोधनं चोरयित्वा क्षेत्रसमीपे समागताः शङ्खनादं श्रुत्वैवमचिन्तयन्-" अहो ! अमी ग्रामपुरुषा गोधनं वालयितुकामा अग्रेऽप्याजग्मुः, यदयं शङ्खनादोऽतिनिकटे भवति " इति विचार्य ते चौरा गोधनं परित्यज्य प्रातस्तरूत्थखगवत् दिशो दिशं पलायाञ्चक्रिरे । ततस्तत् क्षुभितं गोधनं शनैः शनैश्चरदरुणोदयसमये तत्क्षेत्रसमीपमागमत् । स कृषीवलो गोमुखाभिमुखं यावद्धाव तावन्निर्मनुष्यं सर्वं दृष्ट्वैवमचिन्तयत्, मम शङ्खशब्दं श्रुत्वा तस्करा गोधनं तत्यजुः तत्राभिशङ्कया, पापः सर्वत्र शङ्कते । निःशङ्कः स कृषीवलस्तद्गोधनं गृहीत्वा ग्रामे सर्वस्मै ददौ । स उवाच-" मह्यं देवतयाऽदो गोधनं दत्तं भवद्भिर्गृह्यतामिति । ततः स ग्रामवासिजनसमूहेन गोमान् कृतः । ग्रामस्तु तं ग्रामयक्षमिव मेने, यतो यो ददाति स देवता भवति । स कृषीवलो लब्धप्रसरो द्वितीयेऽपि वर्षे क्षेत्रं गत्वा तत्र निशि शङ्खं ध्मातुमारेभे । एकदा त एव चौरा अन्यस्माद् ग्रामाद् गोधनं हृत्वा तत्क्षेत्रस्य निकटे महानिशि समाजग्मुः । तस्य शङ्खधमस्य महान्तं शङ्खध्वनिं श्रुत्वा सुष्ठु सौष्ठवं समाश्रित्य परस्परं जगदुः-" अत्र प्रदेशेऽत्र क्षेत्रे पुरा शङ्खध्वनिर्यथा श्रुतस्तथाऽधुनाऽपि श्रूयते । ते गुहास्त एवावासाः सन्ति । कोऽप्ययं क्षेत्रपालकोऽस्ति, प्राणिभ्यः क्षेत्ररक्षार्थं शङ्खं नूनं धमति । वयं धिक् यत्पुरा शङ्खध्मानेन वञ्चिता अभूम " ततस्ते तस्करा तूलवर्तिका इव हस्तान् घर्षयन्तो दन्तैरधरान् पीडयन्त यथा गोस्तनात् वत्सास्तथा हस्तिनः शुण्डादण्डानिव लकुटानुत्थापयन्तो क्षेत्रान्तर्गोवृषा इव शस्यान्यान्दोलयन्तश्चौरकुञ्जराः शङ्खनादानुसारेण गच्छन्तस्तं मञ्चारूढं शङ्खधमं नरं ददृशुः । ते मञ्चकाष्ठान्यान्दोल्य मञ्चं भूतले न्यपातयन् । सोऽपि कृषीवलो निराधारो भुवि पपात, यतो निराधारं न किञ्चिदप्यवतिष्ठते । ततश्चौराश्च कणमूटकवत् तं लकुटैरताडयन् । स भुञ्जान इव मुखे पञ्चाङ्गुलीश्चिक्षेप । ते चौरास्तत्करौ संयोज्यास्थिनिर्मग्नबन्धं बद्ध्वा बद्धाञ्जलिमिव तमलक्षयन् । चौरास्तस्य गवादिवस्त्रान्तं धनमग्रहीषुः । तदा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षेत्रपालो नग्नः सन् क्षेत्रपाल इवाभवत् । ते चौराः शङ्खधमं तत्रैव मुक्त्वा ययुः । प्रातर्गोपास्तं पप्रच्छुः, सोऽपीदमचकथत्–“ धमेद्धमेत्, परन्तु नातिधमेत्, यतोऽतिध्मातेन यद् ध्मातोपार्जितधनं तन्मया हारितम् ।

हे नाथ ! तस्मात् तवाप्यतिशयः कर्तुं नोचितः । अस्मानपि पाषाणकठोरस्त्वमवज्ञातुं नार्हसि । ततो जम्बूरम्बुशीतलवाचोवाच– “ अहं यथा शैलेयवानरो बन्धनानभिज्ञस्तथा नास्मि । तथाहि —

शैलेयवानरकथा ।

वनलक्ष्म्याऽवन्ध्यो विन्ध्यो नाम गिरिरस्ति । तत्रैको महावानरयूथपतिर्बभूव । विन्ध्याद्रिवनगह्वरे कुमार इव स यूथसम्भवान् सर्वान् वानरान् निराकरोत् । स एवैको महाबलो वानरीभिः सार्धं बहुवनिताराज्यसाम्राज्यसुखलीलां वितन्वन् रेमे । एकदा कश्चिद् युवा वानरो मदोद्धतो वानरीरागाद् वृषस्यन् तं वानरमनादृत्य कस्याश्चिद्वानर्या धवलदन्ताङ्कुरं पक्कारुणविकसद्दाडिमभं मुखं चुचुम्ब । कस्याश्चिन्मुखं केतकीपुष्पपरागेणाऽऽच्छादयामास । कस्याश्चिद् गले गुञ्जाहारं स्वयं कृत्वा पर्यधापयत् । कस्यैचिद् बिल्वदलैर्वीटिकां कारं कारं समर्पयामास । कामपि निर्भरमालिङ्ग्य प्रालम्बहिण्डोलकमध्यास्त । एवं बहुबलगर्वादप्रेतनं यूथपं न जानानो निःशङ्कं वानरीभिररंस्त । तदा कयाऽपि नखैः कण्डूय्यमानलाङ्गूलः, कयाऽपि प्रमृज्यमानसर्वाङ्गरोमराजिः, कयाऽपि कदलीतालवृन्तेन वीज्यमानः, कयाऽपि कमलनालैः क्रियमाणावतंसक उच्चैः शिखरस्थः स जरन् यूथपतिर्द्राग् वानरयुवानं तं दृष्ट्वा कोपादधावत् । लाङ्गूलं नर्तयन् स वानरयूथपतिस्तं वानरयुवानं रोषेण पाषाणखण्डेन जघान । ततः स वानरेन्द्रयुवाऽपि लोष्टाहतः सिंह इव क्रुद्धो घुरघुरारावं कुर्वंस्तं प्रत्यधावत् । मिथः क्रोडीकृतसर्वाङ्गौ तौ दुर्हृदावपि सुचिरान्मिलितौ सुहृदाविव भूतौ दन्ताग्रैस्त्रटत्रटेति अङ्गुलीभिश्चटचटेति परस्परं युध्यमानौ तौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वपुषि व्यापप्रतुः । तदा परस्परं दन्तनखक्षतक्षतजशोणितचर्चितौ परिहितरक्तचोलकाविव तौ शुशुभाते । क्षणाद्बन्धं क्षणान्मोक्षं प्रयुञ्जानौ तावुभौ यथा द्यूतकारौ क्रीडतस्तथा युध्यमानौ तौ रेजतुः । अन्ते वानरयूना मुष्टिप्रहारेण भग्नास्थिः स वृद्धकपिः शीघ्रं शीघ्रमपससार, मन्दं मन्दं च त्वढौकत । ततो युवा वानरस्तं वृद्धवानरमपसरन्तं लोष्टघातेन जघान, तेन वृद्धवानरमस्तकं पुस्फोट । ततः प्रहारपीडितः स वृद्धो यूथपतिर्वानरो दूरोत्पातिमुक्तबाणवन्नंष्ट्वा दूरं ययौ । ततः प्रहारपीडितस्तृषितः स भ्रमन्नेकस्मिन् गिरौ प्रक्षरच्छिलाजतु ददर्श । स जलबुद्ध्या शिलाजतुनि मुखं न्यधात् । ततस्तन्मुखं भूमेरुत्थितमिव तत्रैव विलग्यास्थात् । तेन मन्दमतिना मुखमाकर्षामीति शिलाजतुनि निक्षिप्तौ बाहू लगित्वा तस्थतुः । ततस्तेन क्षिप्तौ पादौ मुखहस्तवद् विलग्नौ । अथ स कीलितपञ्चाङ्ग इव तत्रैव कालधर्ममवाप । पाणिपादाऽबद्धः सः वानरो यदि मुखमाकर्षेत् तदा मुच्येत शैलजलात्, अत्र न संशयः । यथा जिह्वेन्द्रियमात्रलुब्धो मुग्धो वानरो नष्टः, एवं शैलेयनिभासु नारीषु पञ्चसङ्ख्यैर्हृषीकैरपि मज्जन् देही कथं न विनश्येत् ?, तथाऽहं तु नास्मि ।

अथ नभःसेना कृताञ्जलि-ऋषभनन्दनमुवाच–" त्वं स्थविरावन्मा भूः, स्थविरायाः कथा यथा—

स्थविराकथा

एकस्मिन् ग्रामे नामतो बुद्धिः सिद्धिश्च स्थविरे बभूवतुः । ते द्वे अपि परस्परसख्यौ नित्यमत्यन्तदुःस्थिते अभूताम् । तस्य ग्रामस्य बहिः प्रतिष्ठितः प्रसिद्धो भोलको नामाभीप्सितधनप्रदो यक्षोऽस्ति । तं यक्षं बुद्धिनाम्नी दीना स्थविरा प्रत्यहमाराधयामास । सा त्रिसन्ध्यमपि देवकुलं संमार्जयति स्म, यक्षाय च पूजनपुरस्सरं नैवेद्यमर्पयाञ्चक्रे । अन्यदा तुष्टो यक्षस्ते किं ददामीति जगाद, यत आराध्यमानः कपोतोऽपि प्रसीदति । ततो बुद्धिरुवाच–" यदि त्वं तुष्टोऽसि तदा तद्देहि येन सुखसंतोषभागहं जीवामि " । यक्ष उवाच–" हे स्थविरे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बुद्धे ! त्वं सुस्थिता भव, मम पादमूले दिने दिने त्वं दीनारं प्राप्स्यसि " ततः सा तत्प्रभृति प्रत्यहं दीनारं लभमाना कृतकृत्याऽभूत्। स्वजनाज्जनपदाच्च सा वृद्धाऽधिकधनवत्यभूत्, या स्वप्नेऽपि सुन्दरवस्त्रादिसम्भारं नापश्यत् सा प्रतिक्षणं नवं नवं वस्त्रं भूषणं च राज्ञीव पर्यधात् । यस्याः पुनः काञ्जिकेच्छाऽपि नापूर्यत, तस्याः सहस्रशः कुण्डोघ्न्यो धेनवो बभूवुः । याऽऽजन्मापि जीर्णतृणकुटीरे न्यवसत्, सा वेदीमत्तगजशोभितं प्रासादमकारयत् । या परगृहगोमयत्यागकर्मणाऽजीवत्, तस्याः स्तम्भलग्नाः पाञ्चाल्य इव दास्यः सेविका बभूवुः । या स्वग्रासचिन्ताकुलिता सदाऽभूत्, सा यक्षदत्तसम्पदा दीनानुद्धर्तुं प्रारेभे ।

ततः सिद्धिनाम्नी स्थविरा तादृशीं बुद्धिसम्पदं दृष्ट्वा जातमत्सराऽचिन्तयत्–" अहो अस्याः कुत ईदृशी सम्पत् सम्पन्नाऽभूत् ? भवतु, अस्याः सदा सखीत्वेनाहं विश्वासभागस्मि, तस्मादिमामेव चाटुशतानि कृत्वा प्रक्ष्यामि " । एवं विचिन्त्य बुद्धिमती सिद्धिर्बुद्धिं स्थविरामुपययौ । बुद्ध्या च प्रियसखीति सा सत्कृता सत्युवाच–" हे सखि ! बुद्धे ! तवेदृश्यचिन्तिता सम्पत् कुत आगात् ? तव सम्पद्दर्शनेन चिन्तामणिः प्राप्त इवानुमीयते । अथवा किं ते कोऽपि राजा प्रासीदत् ? वा काऽपि देवता ?, किं वा किमपि निधानं प्राप्तम् ? वा किं कोऽपि रसः साधितस्त्वया ?, हे सखि ! सम्पद्वत्या त्वयाऽहमपि सम्पत्तिमत्यभूवम् । अद्य मया दारिद्र्यदुःखाय जलाञ्जलिरदायि । अहं त्वं त्वमहम्, प्रीत्या देहेऽप्यावयोर्न भेदोऽस्ति । आवयोः परस्परं किमपि नाकथनीयमतस्त्वं कथय–" इयं सम्पत् कुत आगमत् " । ततो बुद्धिस्थविरा तद्भावमबुध्यमाना यथातथमकथयत्, यथा मया यक्ष आराधितः, यथा च यक्षेण सम्पद् दत्ता, तथा साऽख्यात् ।

ततः सिद्धिस्तच्छ्रुत्वा दध्यौ–" साधु साधु ममापि धनोपार्जनोपायो निरपायो भविष्यति । अहं सविशेषं यक्षमाराधयिष्यामि,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथा मे सविशेषा सम्पद् भविष्यति । अथ धनप्राप्तये सिद्धिस्थविरा बुद्धिदर्शितप्रकारेणाहर्निशं यक्षमाराधयितुमारेभे । सा सिद्धिर्विविधभक्तिभिः खटिकाधातुभिर्यक्षस्य मन्दिरं भूषयामास, तथा सोपानश्रेणिं चालञ्चकार । कर्तव्यभक्तिप्रकारांस्तन्निभान् गणयन्तीव सा स्वस्तिकरेखाभिर्यक्षाङ्गणं भूषयामास । सा स्वयं जलमानीय प्रत्यहं स्वीकृतोपासनानियमा यक्षं स्नपयामास । सा स्वयमाहृतैर्बिल्वदल-करवीरतुलसीकुब्जकादिभिर्यक्षं त्रिसन्ध्यं पूजयाञ्चकार । सा यक्षमन्दिरे यक्षाभियोग्यव्यन्तरीवैकभक्तोपवासादितत्पराऽहर्निशं न्यवसत् । तत एवमाराधितस्तुष्टो यक्ष उवाच–" हे महाभागे ! अहं तुष्टोऽस्मि । यदिच्छसि तत्प्रार्थयस्व " । अथ सा सिद्धिः पूर्णसम्पदं यक्षं प्रार्थयाञ्चकार–" हे यक्ष ! त्वया मत्सख्यै बुद्ध्यै यद्दत्तं तद्द्विगुणं मे देहि " । ततो भोलाख्यो यक्ष एवमस्त्वित्युक्त्वाऽन्तर्दधौ । ततः सिद्धिरपि क्रमेण बुद्धितोऽधिकसम्पत्तिभाक् समजनि ।

बुद्धिः सिद्धिं द्विगुणसम्पत्तिलाभेनाधिकर्द्धिं दृष्ट्वा पुनरपि यक्षमाराधयत् । यक्षोऽपि तुष्टस्तस्यै तद्द्विगुणं धनं ददौ । ततः सिद्धिस्तस्याः स्पर्धया पुनरपि यक्षमाराधयत् । ततस्तुष्टे यक्षे दुष्टात्मा सिद्धिश्चिन्तयामास–" अहं प्रसन्नाद्यक्षाद् यत्किञ्चित् प्रार्थयिष्ये तद्द्विगुणं द्रव्यं बुद्धिर्यक्षमाराध्य प्रार्थयिष्यति । तस्मादहं तद्याचे यद् द्विगुणमर्थितं बुद्धेरपकाराय जायेत, तदा मे बुद्धिः साधीयसी स्यात् । इति चिन्तयित्वा मे नेत्रमेकं काणीकुरु इत्ययाचत । यक्षेणैवमस्त्वित्युक्ते सद्यः सा काणा बभूव । ततो बुद्धिः पुनर्मम सख्यै यक्षः किमप्यधिकं ददाविति तद्द्विगुणकाङ्क्षिणी सती यक्षमाराधयामास । ततस्तुष्टाद् यक्षाद् बुद्धिरप्येतादृशं प्रार्थयामास–" हे यक्ष ! सिद्ध्यै यद् दत्तं तद्द्विगुणं मे देहि । " यक्ष एवमस्त्विति कथयित्वा तिरोदधे । सा बुद्धिः सद्योऽन्धाऽभवत् । यतो देवतावचो मिथ्या न भवति एवं बुद्धिस्थविरा पूर्वप्राप्तया सम्पदाऽतृप्ताऽतिलुब्धा स्वेनैव स्वं विनाशयामास । एवं मानुषश्रियं प्राप्यातिश्रियमिच्छंस्त्वमप्यन्धस्थविरावद् भविष्यसि ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो जम्बूनामोवाच–" हे देवानांप्रिये ! अहो ! ! अहं नोत्पथगाम्यस्मि, यथा जात्याश्वस्तथा । तस्य कथां शृणु—

जात्याश्वकथा

तथाहि—वसन्तपुरपत्तने प्रतापेन जितशत्रुरद्भुतलक्ष्म्या विराजमानो जितशत्रुनामा राजाऽभूत् । बुद्धिधनवतां श्रेष्ठः श्रेष्ठी जिनदासनामा विश्वासपात्रं मित्रं तस्य राज्ञोऽभूत् । एकदाऽश्वपालका लक्षणवन्तो रेवन्तपुत्रानिवाश्वकिशोरांस्तं राजानमदर्शयन् । तदा राजाऽश्वलक्षणविदामादिदेश–" के केऽश्वाः कैःकैर्लक्षणैः सम्पूर्णा इति कथयत "। ते च शास्त्रोक्ताश्वलक्षणसम्पन्नमेकं घोटककिशोरं राजानं न्यवेदयन् ।

असावश्वो वृत्तखुरः स्तब्धसन्धिर्जङ्घाखुरमध्ये, निर्मांसजानुजङ्घास्यः कुञ्चितोन्नतकन्धरः स्निग्धरोमा कोकिलस्वरो मल्लिकाक्षो लघुस्तब्धश्रवणो लम्बकेसरः पञ्चभद्रो गूढवंशः स्कन्धादिसप्तके स्थूलः, उरस्यादिध्रुवावर्तदशकेन भूषितः, बुद्धावर्तादिदुष्टावर्तरहितः स्निग्धदन्तोऽयं किशोरः स्वामिनो लक्ष्मीं पुष्टीकरोति । " स्वयं विज्ञो राजाऽपि तमश्वं लक्षणवन्तं विज्ञाय केसरयुतजलेन स्वयं सर्वाङ्गमानर्च । अथ राजा तस्याश्वस्य पुष्पवस्त्रैः पूजां विधाय लवणोत्तारणादिकां कारयामास । अचिन्तयच्च–एनमश्वं को रक्षितुं समर्थः ? प्रायेण भूतले रत्नानि विघ्नबहुलानि भवन्ति । अथवा मम विश्वासपात्रं प्रख्यातो जिनदासनामा श्रावको मम परमप्रियोऽस्ति । स च बुद्धिमान् स्वामिभक्तः प्रमादहीनश्चास्ति । स एवैदृशाश्वस्य न्यासपात्रं भवितुमर्हति ।

अथ राजा जिनदासमाहूयाऽऽदिशत्–" अयमश्व आत्मेव त्वया रक्ष्यः "। ततो जिनदास " आदेशः प्रमाण "मित्युक्त्वा रक्षकयुतं तमश्वं गृहे निन्ये । स तस्याश्वकिशोरस्य स्थानं क्षिप्तकोमलवालुकं गङ्गापुलिनवत् सुखदं रचयामास । स तमश्वं रजोरहितानि पत्रलानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वादूनि हरितानि तृणानि स्वयमेव भोजयामास । स स्वयं तमश्वं वालुकामध्ये लोष्टकण्टकहीने भूप्रदेशे मुखरज्जौ धृत्वा वेल्लयामास । स स्वस्नानसमये सुगन्धिभिः स्नानीयैरेकतस्तैर्जलैस्तमश्वं स्नपयामास । नीरोगोऽयं न वेति प्रत्यहं तमश्वं परीक्षितुं तस्य नेत्रपक्ष्मणी पर्यस्य पर्यस्य ददर्श । स्वयं तमारुह्य स प्रथमधारया सुखं वेल्लयन्ननुदिनं सरसि जलं पाययितुं निन्ये । तस्य गृहस्य सरोवरस्य चान्तरे महज्जिन-मन्दिरमासीत्, यत् संसारसागरस्यान्तरीपमिव कदापि तेन नाऽऽक्रान्तमभूत् । अर्हन्मन्दिरानादरो माभूदिति सोऽश्वारूढस्त्रिःप्रदक्षिणी-कृत्य गमागमकाले प्रतिदिनं स्वं कृतार्थयन्नासीत् । स देवतत्त्वज्ञोऽश्वारूढोऽपि देवमवन्दिष्ट, प्रमादो मा भूदित्यश्वादुत्तीर्य न प्राविशत् । जिनदासस्तमश्वं तथाऽशिक्षयत् यथा स सरोगृहं चैत्यं च विहायान्यत्र नागच्छत् । यथा यथा शनैः शनैः सोऽश्वकिशोरो ववृधे तथा तथा राजगृहमध्ये सम्पदो ववृधिरे । तदश्वकिशोरप्रभावेण स राजा सर्वभूपतिमध्ये आज्ञाकारकेन्द्रोऽजायत । ते चाऽऽज्ञाकरणोद्विग्ना राजान एवं दध्युः–" यदश्वप्रभावाद्वयं जिताः सोऽश्वो मारणीयोऽथवा हरणीयः " । तस्याश्वस्य तथाकर्तुमशक्तेषु राजस्वेकस्य सामन्तस्य बुद्धिमान् मन्त्री जगाद–" अहं केनाप्युपायेन तमश्वं हरिष्यामि" उपायस्य किं दुष्करम्? यत उपायशक्तेर्मानं नास्ति ।" स धीनिधिर्मन्त्री एवं कुर्विति सामन्तेनादिष्टो मायया श्रावकीभूय वसन्तपुरपत्तनमगात् । स तत्र चैत्यानि वन्दित्वा सुविहितानपि मुनीन् वन्दित्वा जिन-दासगृहं गत्वा तद्गृहचैत्यमवन्दत । श्रावकवन्दनेन जिनदासं धूर्ततया श्रावकत्वं दर्शयन् स ववन्दे । अथ साधर्मिकवत्सलो जिनदासस्त-मभ्युत्थाय वन्दित्वा पर्यपृच्छत्-" महाशय ! कुत आगमत् ? " । ततः कपटश्रावक उवाच–" अहं निःसारे संसारे विरक्तोऽस्मि, " अहं शीघ्रं प्रव्रजिष्यामि, मम गार्हस्थ्येनालम्, अहं निष्कपटो धर्मबान्धवस्तीर्थयात्रां कृत्वा सुगुरोः पार्श्वे प्रभवत्पुंव्रतं व्रतं ग्रहीष्यामि ।" जिनदासोऽप्युवाच–" हे महात्मन् ! तव स्वागतमस्तु, समानशीलयोरावयोर्धर्मगोष्ठीसुखानि भवन्तु । धर्मिषु दानशौण्डः स तथेति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वीकृतवन्तं तं मायाश्रावकं निजबन्धुमिव प्रेम्णा स्नपयामास । तस्य शिरसि स्नानेन निर्मलीकृतकेशान् कस्तूरीपङ्कमलिनांश्चकार । तस्य सामन्तमन्त्रिणो मूर्धनि आलेख्यालिखितसन्निभं पुष्पमाल्यगर्भं धम्मिल्लमबध्नात् । सुगन्धिना तनीयसा चान्दनेन ज्योत्स्नासदृशेनाङ्गरागेण तस्याङ्गमचर्चयत् । स धर्ममतिस्तं निर्दग्धागरुकर्पूरकस्तूरीवासितानि वस्त्राणि पर्यधापयत् । जिनदासः क्षणेन तदर्थं लेह्यचोष्यपेयाऽऽस्वाद्यहृद्यां रसवतीमकारयत् । ततो जिनदासेन हंसरोमासनमध्यासितः स मन्त्री विविधैर्भोज्यैर्विलुलद्व्यजनपवनमभोजि ।

अथ भोजनानन्तरं जिनदासस्तेन दुरात्मना कपटश्रावकेण धर्मकथां प्रारेभे । तदा जिनदासस्यैकः स्वजनोऽभ्येत्योवाच–" हे बन्धो ! श्वः कल्याणकार्येण मम गृहमुपेहि; तत्र त्वया सकलमहोरात्रं स्थातव्यम्, यतस्त्वं कल्याणकुशलोऽसि, त्वया विना कल्याणं किम् ?" ततो जिनदास ओमित्युक्त्वा तं विसृज्यातिहारगीः सरलस्तं कपटश्रावकमुवाच–" हे अभ्यागत ! मया स्वजनगृहेऽवश्यं गन्तव्यं, मयि गते मद्गृहं त्वद्गृहमिति तद्रक्षणीयम् । " ओमिति हसन् स स्वीचकार । ततोऽस्मिन् दुर्मतौ जातविश्वासो जिनदासो जगाम । तस्मिन् दिने पुरे महान् कौमुद्युत्सवो हल्लीसपूर्वकं पुरवधूरासकलायुतोऽभवत् । रात्रौ जनपदे कौमुदीमहदुर्मदे सति स मायाश्रावकस्तमश्वमादाय निर्जगाम । सोऽश्वोऽपि चैत्यस्य त्रिः प्रदक्षिणां कृत्वा वार्यमाणोऽपि तस्मिन् सरसि जगाम नान्यत्र । ततः परावृत्तः सोऽश्वः पुनर्देवालयमगात्, देवालयाद् गृहं ययौ नान्यत्र कुत्रचित् । स दुःसामन्तसचिवस्तमश्वमन्यत्र नेतुं शक्तो यावन्नाभूत् तावद् रात्रिः प्रकाशिताऽभूत् । स दुरात्मा पलायिष्ट । सूर्य उदगात्, तदा जिनदासोऽपि गृहं प्रति न्यवर्तत । आगच्छज्जिनदासो जनमुखादिदं शुश्राव–" तवाश्वः कौमुदीमहे सकलां रात्रिं वाहितः " । किमेतदिति चकितो जिनदासोऽपि गृहमगात् । तमश्वं श्रान्तं क्षामं स्वेदमलिनं च ददर्श । भाग्येनायमश्वोऽस्ति, अहं तु धर्मच्छलेन वञ्चितोऽस्मि, इति स हर्षविषादौ प्राप । तत्प्रभृति स तमश्वं सविशेषमरक्षत् । स उत्पथं न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगामेति जिनदासस्यातीव प्रियोऽभूत् । तमश्वमिव मां कोऽप्युत्पथं नेतुं न शक्नोति । तस्मात् परलोकसुखदं पन्थानं न त्यक्ष्यामि ।

अथ कनकश्रीः प्रेमबन्धुरं सहासमुवाच–" हे स्वामिन् ! ग्रामकूटसुत इव त्वं जडो मा भव । " तथाहि—

ग्रामकूटसुतकथा ।

एकस्मिन् ग्राम एको ग्रामकूटसुतोऽभूत् । स मृतपितृकोऽत्यन्तदुःखितमातृको बभूव । रुदती माता तमुवाच–" हे पुत्र ! त्वं कापुरुषशिरोमणिरसि । तव परकथां विनाऽन्यत् कर्म नास्ति । तव पिता व्यवसायी व्यवसायेनाजीवत् । आरब्धं व्यवसायं सदा निरवाहयत् । त्वं तु युवाऽपि व्यवसायं कदापि नारभसे । आरब्धव्यवसायस्य निर्वाहे कथैव का ? । तव समानवयसः स्वेन कर्मणा जीवन्ति । त्वं पद्मशण्ड इव भ्राम्यन् निष्कर्मा सन् न लज्जसे । महादारिद्र्येणेदमुदरं बिभर्षि । त्वमुदरे भृते कोशो भृत इति मन्यसे । " ततः पुत्र उवाच–" हे मातः ! अतः परमहमनर्गलो न भविष्यामि, धनोपार्जनोद्यमं करिष्यामि । हे मातर्यथा मे पितोत्साही प्रारब्धं व्यवसायं धनोपार्जनाय निरवाहयत् तथाऽहमपि करिष्यामि ।

एकदा ग्रामसभायामुपविष्टस्य पश्यतस्तस्य कस्यचित् कुम्भकारस्य गर्दभः पादबन्धनं त्रोटयित्वाऽनश्यत् ! पलायमानं तं गर्दभं कुम्भकारोऽप्यन्वधावत् । खरं धर्तुमशक्तः स इदमूर्ध्वबाहुरुवाच–" भो भो ग्रामसभोपविष्टाः सर्वेऽपि ग्रामबालकाः ! युष्माकं मध्ये कोऽपि समर्थोऽस्ति यो मम खरं धृत्वा मेऽर्पयेत्, ततो ग्रामकूटसुतस्तस्मादर्थलाभं विचिन्तयन् धावित्वा तं खरं पुच्छे वृन्ते फलानीवाग्रहीत् । स लोकैर्वार्यमाणोऽपि यावत्तं खरं नामुचत् तावत्तत्पादाघातेन भग्नदन्तः सन् भूतलेऽपतत् । तस्मात् हे नाथ ! त्वमप्येवमसद्ग्रह-मनुत्सृजन् यत्फलं प्राप्स्यसि तन्मया न किमपि ज्ञायते । अथ जम्बूनामा हसन्नुवाच–"स्वकार्यग्रहिलः सोल्लक इव नाहमस्मि, तथाहि–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोल्लककथा ।

एकस्य भुक्तिपालस्यैकोत्तमा घोटिकाऽभूत्; तां स पुत्रीमिव स्वयमलालयदपालयच्च । सोऽश्ववृद्धिदं सोल्लकं नामपुरुषं समादिश्य तां घृततैलौदनादिभिरसेवत । परं च सोल्लको घोटिकार्थं दत्तं स्वादुस्वादुभोज्यं किञ्चित्तस्यै दत्वाऽधिकं स्वयमेव बुभुजे । सोल्लकोऽपि चिरं तया वञ्चनया घोटिकाजीवविषयमाभियोगिकं कर्मार्जयामास, स तेन वञ्चनकर्मणा कालधर्मं प्राप्य वने मूढः पान्थ इव दीर्घकालं तिर्यग्गतौ भ्राम्यन्नेकदा क्षितिप्रतिष्ठनगरे सोमदत्तनामकब्राह्मणस्य सोमश्रीकुक्षिजः पुत्रो बभूव । साऽवेती मृत्वा भवं भ्रान्त्वा तस्मिन्नेव पुरे कामपताकागणिकायाः पुत्रीत्वेनोत्पन्ना । स सोल्लकजीवोऽपि मातापितृभ्यां पोष्यमाणः कणभिक्षया क्रमेण यौवनं प्राप । धात्रिभिर्हारयष्टिवत् हृदयाग्रे धार्यमाणा साऽपि वेश्यापुत्री क्रमेण यौवनं प्राप । तस्याः वपुःपात्रनयो रूपयौवनयोः परस्परं भूष्यभूषणताऽत्यन्तं समानैवाभवत् । मालत्यां भ्रमरा इव तस्यां महाधनिका ग्रामतरुणाः परस्परं स्पर्धमाना अत्यन्तमनुरक्ता बभूवुः । सोऽपि ब्राह्मणपुत्रस्तस्यामासक्तः श्वेव तद्द्वारमशिश्रियत्, यतः कामः सर्वङ्कषो भवति । सा वेश्यापुत्री महाधनिभिर्भूपामात्यश्रेष्ठिपुत्रादिभिः सह रममाणा तं ब्राह्मणसुतं तिरश्चकार, परन्तु स तां दृष्ट्वैवाजीवत् । सा तु तं दरिद्रं दृष्ट्वापि न सम्भावयामास । यतो वेश्यानामयं स्वभावोऽस्ति यद्धनिनि रागो भवति न तु दीने । स ब्राह्मणसुतः कामबाणपीडितस्तत्पार्श्वं त्यक्तुमसक्तस्तस्या दासत्वं स्वीचकार । स कृषिकर्माणि सारथ्यं जलवाहनं कणपेषणं च चक्रे । तस्य किमप्यकार्यं नाभूत्, स बहिष्क्रियमाणोऽपि तद्गृहान्न बहिर्जगाम । तृषां बुभुक्षां भर्त्सनां ताडनाद्यपि सेहे । तस्माद्युष्माखु घोटिकासदृशीष्वहमाभियोगिकं कर्म नार्जयिष्यामि यथा सोऽर्जयत्तथा, युष्माकं युक्तिकल्पनैरलम् ।

ततः कमलवत्युवाच–"हे नाथ ! मा साहसपक्षिवत् त्वं साहसिको मा भूः, तथाहि—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मासाहसपक्षिकथा।

एकः पुमान् दुर्भिक्षपीडितः स्वजनं विहाय महता सार्थेन सह देशान्तरे चचाल। एकस्मिन् महावने सार्थ आवासिते सति स एकोऽपि तृणकाष्ठाद्यानेतुं निर्ययौ। तदा वनगह्वरे एकः पक्षी सुप्तव्याघ्रमुखाद्दन्तलग्नमांसखण्डान्यादाय वृक्षमारोहत्। मा साहसमिति पुनः पुनर्भणन् मांसखादकः सः पक्षी तेन पुरुषेण सविस्मयमगादि, मा साहसमिति भणसि व्याघ्रमुखान्मांसं च खादसि, त्वं मूर्खो दृश्यसे, यतो वचनानुरूपं न करोषि।" तस्मात् साक्षाद् भवसुखं हित्वाऽदृष्टसुखेच्छया तपश्चिकीर्षुस्त्वमपि मासाहसपक्षिवदसि। ततो हसित्वा जम्बूरुवाच–" त्वद्वचसा नाहं मुह्यामि, मित्रत्रयकथां जानानोऽहं स्वार्थान्न भ्रश्यामि।

मित्रत्रयकथा।

तथाहि—क्षितिप्रतिष्ठनगरे जितशत्रुभूपतेः सर्वत्राधिकारी सोमदत्तनामा पुरोहितोऽभूत्। तस्य सहमित्रनामैकः सुहृदभूत्, स भोजनपानादिभिरैक्यवान् सर्वत्र मिलित आसीत्। तस्य पुनः पर्वमित्रनामाऽपरः सुहृदभूत्। स च पर्वस्वागतेष्वेव सन्मान्य आसीन्नान्यदा। तस्य प्रणाममित्रनामा तृतीयः सुहृदभूत्, स यथादर्शनं वार्तालापकमात्रो बभूव। एकदा तस्य पुरोहितस्य कस्मिंश्चिदपराधे समागते भूपतिश्चण्डशासनस्तं निग्रहीतुमैच्छत्। दीनः पुरोधा राजाभिप्रायं विज्ञाय रात्रावेव सहमित्रनाममित्रस्य गृहं ययौ। अद्य मे राजा रुष्ट इत्युक्त्वा पुरोहितस्तमुवाच 'हे मित्र! त्वद्गृहेऽशुभामवस्थां गमयामी'ति। हे मित्र! आपत्काले ह्युपस्थिते मित्रं ज्ञायते, तस्मात् त्वं स्वगृहे मां गोपयित्वा मित्रतां सफलीकुरु।" ततः सहमित्र उवाच–" हे मित्र! आवयोः सम्प्रति मैत्री न भवितुमर्हति, यावद्राजभयं ते न तावदेव नौ मैत्री। मद्गृहे राजदूषितो वसंस्त्वं ममाप्यापदे स्याः, ज्वलदूर्णमूर्णायुं को नाम गृहे क्षिपेत्?। अहं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वत्कृते सकुटुम्बमात्मानं कथमनर्थे पातयिष्यामि, तस्मादन्यत्र याहि, तव कल्याणमस्तु" एवं सहमित्रेणानादृतः सोमदत्तः शीघ्रं पर्वमित्रस्य गृहं ययौ । तत्र स द्विजस्तदाश्रयमीप्सुस्तथैव राजकोपवृत्तान्तं न्यवेदयत् । पर्वमित्रोऽपि पर्वमैत्र्या निष्कपटकाम्यया महाप्रतिपत्त्या तं दृष्ट्वोवाच–"हे सखे ! त्वयाऽनेकपर्वसु संभाषणादिभिः स्नेहप्रकारैर्मत्प्राणा अपि क्रीता, हे भ्रातर्यदि तव दुःखभागहं न भवामि तदा मम कुलीनस्य कुलीनता नावतिष्ठते । त्वत्प्रेमाधीनोऽनर्थमपि सहे, किन्तु मे कुटुम्बमप्यनर्थं गच्छेदिति दुःसहं प्रतिभाति । हे सखे ! कुटुम्बमपि मेऽतिप्रियं त्वमपि प्रेयानसि, अत्र किं करोमि ? इतो व्याघ्र इतस्तटी वर्तते। सकीटकपलाशवदहं बालपरिवृतोऽस्मि, तस्मात्तेभ्यो बालेभ्योऽनुकम्पय । तव स्वस्त्यस्तु, त्वमन्यत्र याहि ।" एवं सत्कृत्यापि तेन स पुरोधा दूरीकृतो निर्ययौ । यतो दैवे रुष्टे पुत्रोऽपि शत्रूयते । चत्वरपर्यन्तमनुगम्य परावृतः पर्वमित्रः ।

अथ दुष्प्रापरोधाः पुरोधा व्यसनवारिधिर्दध्यौ–"मया ययोरुपकृतं तयोः परिणामोऽयम्, तस्मात् कस्य सम्प्रति दीनोऽहं पारिपार्श्विको भवामि । अद्य प्रणाममित्रस्य मित्रस्य समीपं यामि । तत्रापि मे प्रत्याशा नास्ति, यतस्तस्मिन् वाङ्मयी प्रीतिरस्ति, यद्वा वितर्केणालम्; सोऽपि किञ्चिन्मित्रं वर्तते, तस्मात्तमपि पश्यामि, यतः कस्यापि कोऽप्युपकारको भवति । इति प्रणाममित्रस्य गृहं ययौ । सोऽभ्यागतमात्रं तं कृताञ्जलिरभ्युत्तस्थौ, उवाच च–"तव स्वागतमस्तु, युष्माकं किमीदृशी दशा वर्तते ? मया किं प्रयोजनं कथय यदहं ते करवाणि" ततः पुरोहितो राजवृत्तान्तमाख्याय तं प्रतीदमुवाच–"हे सखे ! अस्य राज्ञः सीमां त्यक्ष्यामि, मे सहायतां कुरु ।" सोऽप्युवाच–"हे सखे ! प्रियालापैः तवाहमृणी वर्ते,. अधुना ते साहाय्यं कृत्वाऽनृणी भविष्यामि । त्वं मा भयं कार्षीर्यतस्तेऽहं पृष्ठरक्षकोऽस्मि । मयि जीवति सति तव रोम्णोऽपि विप्रियं कर्तुं न कोऽपि शक्नोति," इत्युक्त्वा प्रणाममित्रः पृष्ठकृततूणीरोऽधिज्यीकृतचापो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निःशङ्कः तं पुरोहितमग्रे चक्रे । पुरोधास्तेन सहेष्टं स्थानं ययौ । तत्र निःशङ्को वैषयिकं सुखमन्वभवत् । अत्र चायमुपसंहारः–तत्र जीवः सोमदत्तसदृशोऽस्ति, सहमित्रमित्रस्य तुल्यो विग्रहो भवति, यतोऽयं विग्रहः सत्कृतोऽपि कर्मराजकृतायां मरणापदि जीवेन सह मनागपि नागच्छति । सर्वे स्वजनबान्धवाः पर्वमित्रसमाना ज्ञेयाः, यतस्तेऽखिलाः श्मशानचत्वरं गत्वा निवर्तन्ते । शर्मनिबन्धनं धर्मस्तु प्रणाम-मित्रसदृशो ज्ञातव्यः, यो धर्मः परलोकेऽपि गच्छता जीवेन सह गच्छति । तस्माद् हे मनस्विनि ! अहमैहलौकिकसुखास्वादमूढः परलोकसुखं धर्मं न त्यक्ष्यामि । ततो जयश्रीरुवाच–" हे नाथ ! बुद्धिमन् ! त्वं कूटकथानकैर्मां नागश्रीवत् परं मोहयसि ।

नागश्रीकथा ।

तथाहि––रमणीयनामपुरे कथाप्रियो राजाऽभूत् । स वारं वारेण पौरेभ्यः प्रतिदिनं कथां कथयामास । तस्मिन् पुर एको ब्राह्मणो दैन्यपीडितः संपूर्णदिनं भ्रामं भ्रामं कणभिक्षयाऽजीवत् । एकदा निरक्षरवरस्य तस्य विप्रस्य कथानकदिनमभूत् । स चेतसि चिन्तयामास– " स्वनामकथनेऽपि मम जिह्वा सन्निपातवती सदा स्खलति चेत्तदा कथाकथने कथं समर्था भविष्यति ? । यद्यहं कथां कथयितुं न जान इति वदामि तदाऽहं कारागारे नीये, ततः का गतिर्मे भविष्यति ? ।" तस्य विप्रस्य कुमारीकन्या तं चिन्तितमुखं दृष्ट्वा पप्रच्छ– "तव का चिन्ता ?" ततो विप्रश्चिन्ताकारणं कथयामास । ततः कन्योवाच–" हे पितस्त्वं चिन्तां मा कृथाः, त्वद्द्वारेऽहं राजसमीपं गत्वा कथां कथयिष्यामि" इति स्नात्वा श्वेतवस्त्रं परिधाय राजसमीपं गत्वा जयाशिषं दत्त्वा सा राजानमुवाच–"राजंस्त्वं कथां शृणु" । राजाऽपि कन्यायास्तादृशधार्ष्ट्येन विस्मितो मृग उच्चैर्गीतिमिव कथां श्रोतुमुत्कर्णो बभूव । साऽपि कथयितुं प्रारेभे–" राजन् ! इहैव पुरे नाग-शर्माग्निहोत्री द्विजोऽस्ति । स च कणभिक्षैकजीविकोऽस्ति । तस्य सोमश्रीनाम्नी भार्याऽस्ति, तस्याः कन्याऽहमस्मि, मम नाम नागश्रीरिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अहं क्रमेण यौवनं प्राप्ताऽस्मि । अहं पितृभ्यां द्विजपुत्राय चट्टनाम्ने दत्तास्मि, यतः स्त्रीणां वरः सम्पदनुरूपो भवति । अन्यदा केनाप्यौद्वाहिकेन कार्येण मां गृह एकाकिनीं मुक्त्वा ग्रामन्तरं ययतुर्मे पितरौ । मम पितरौ यस्मिन्नेव दिने ग्रामान्तरमगमताम्, तस्मिन्नेव दिने मद्गृहे चट्टाख्यो विप्र आगात् । तदा पितरौ विनापि तस्य सम्पदनुसारेण स्नानभोजनादिभिरहमातिथ्यमकार्षम् । दिनात्यये तस्य शयनाय स्वगृहसर्वस्वं खट्वाप्रस्तरणमेकमदाम् । ततो मयाऽचिन्ति–" यदस्य पर्यङ्कः समर्पितः प्रसर्पत्सर्पायां गृहभूमौ कथमहं शये ? । तद्भीताऽहमस्य शय्यायां शये, गाढान्धकारावृतरात्रौ मां कोऽपि न द्रक्ष्यति । " इति निर्विकारेण मनसा तत्रैवाहमस्वाप्सम्, ततश्चट्टो विप्रो मदङ्गस्पर्शेन कामातुरोऽभूत् । लज्जया क्षोभेण विषयनिरोधेन च तस्य सद्यः शूलरोग उदपद्यत । स तु तेन पञ्चत्वं प्राप । तं गतप्राणं दृष्ट्वा भीताऽहमचिन्तयम्–" अयं द्विजो मम पापाया दोषेण मृत्युं प्राप, अद्य कस्य कथयामि, अत्र क उपायः ? किं करोमि ? अहमेकाकिनी तं गृहात् कथं निःसारयामि ? इत्यहं तद्वपुः कूष्माण्डमिव खण्डशोऽकार्षम् । गर्तं खनित्वा तत्रैव निधानमिव तं न्यधाम् । तं गर्तं पूरयित्वोपरि समतलं कृत्वाऽमार्जयमलिपं च, यथा हि तत् केनापि न ज्ञायते । तत्स्थानं पुष्पगन्धधूपैर्वासितं मया । अधुना मम पितरौ ग्रामान्तरादागतौ स्तः । राजाप्युवाच–" हे कुमारि ! यदिदं त्वया कथितं तत्सर्वमपि किं सत्यमस्ति ? " ततः सा पुनरुवाच–" हे राजन् ! त्वं यानि कथानकानि शृणोषि तानि यदि सत्यानि तदा मयोक्तमप्येतत्सर्वं सत्यम् ? "

हे नाथ ! नागश्रिया यथैव राजा विस्मापितस्तथा त्वमपि मां कल्पितकथानकैः किं प्रतारयसि !, जम्बूरूचे–हे सर्वाः प्रियाः ! अहं ललिताङ्गवद् विषयलोलुपो नास्मि,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ललिताङ्गकथा ।

तथाहि— वसन्तपुरं नाम नगरमस्ति। तत्र विभूतिमानिन्द्र इवाज्ञया कन्दर्प इव रूपवान् शतायुधो नाम राजाऽभूत् । तस्य ललिताकृतिर्देवीव ललितानाम्नी भार्या बभूव । सा सकलकलापूर्णाऽभूत्। सैकदा स्वनयने विनोदयितुं मत्तवारणमारुह्याधः संचरन्तं जनं द्रष्टुमारेभे, विशालेन सुन्दरेण धम्मिल्लेन द्विमस्तकमिव कस्तूरीपङ्किलश्मश्रुं समदं गजमिव वृषस्कन्धं विशालवक्षसं कमलतुल्यकरचरणं जात्यस्वर्णभूषितग्रीवापाणिपादं कर्पूरपूर्णताम्बूलस्फुरन्मुखसुगन्धि कामविजयपताकोपमं तिलकशोभितललाटमङ्गरागव्याजेनेव मूर्तलावण्यवन्तं धूपायितवस्त्रसुगन्धमेदुरीकृतपथं वपुःश्रिया लक्ष्मीदेव्या द्वितीयपुत्रमिव मार्गे गच्छन्तं युवानं कंचन पुरुषं साऽपश्यत् । तद्रूपदर्शनोन्मत्तनयना सुनयना सा स्तब्धा तद्गतचित्ता चित्रलिखितैवाभूत् । सैवं दध्यौ–" यद्ययं पुमान् परस्परबाहुलताबन्धसुन्दरमालिङ्गयेत मया तदा मे स्त्रीजन्म सफलं भवेत् । यद्यहं पक्षिणी स्यां तदा स्वयं दूतीभूयोड्डीय गत्वाऽमुं भजे ।

ततस्तत्पार्श्वस्थैका चतुरा चेटी दध्यौ–"मम स्वामिन्या दृष्टिर्नूनमस्मिन् यूनि पुंसि रमते"। ऊचे च–" हे स्वामिनि! तव मानसमत्र यूनि रमते ? अत्र नाश्चर्यं, कस्य नेत्रे चन्द्रो नाऽऽनन्दयति ? ललितोवाच–हे बुद्धिमति! साधु साधु त्वं मनोज्ञाऽसि। यद्यहमिमं मनोहरं नरं भजे तदा जीवामि । अयं कोऽस्तीति तावन्मां ज्ञापय । ततस्तथा कुरु, यथा सङ्गमय्यामुं मे वपु निर्वापयसि । " सा चेटी गत्वा तत्स्वरुपं ज्ञात्वा च धैर्यपूर्वकं शीघ्रं राज्ञ्यै व्यजिज्ञपत्–" हे स्वामिनि ! अत्रैव वास्तव्यो ललिताङ्गनामाऽयं समुद्रप्रियनाम्नः सार्थवाहस्य पुत्रोऽस्ति । अयं सौभाग्यकामदेवो द्वासप्ततिकलावान् कुलीनो युवा चेति सुपात्रे ते मनो रमते । अस्याऽऽकृत्यनुसारेण गुणानपि निश्चिनु । लोकेऽपि 'यत्राऽऽकृतिस्तत्र गुणा वसन्ति' इति गीयते । यथा त्वं नारीष्वेका गुणवत्यसि तथाऽयमपि नरेषु । तस्माद् द्वयोर्गुणिनोर्योगं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घटयामि, मां समादिश । " एवं कुर्विति राज्युवाच । तदर्थं तस्या हस्ते प्रेमाङ्कुरमेघजलश्लोकाङ्कं लेखमर्पयामास ।

सा दास्यपि दूतीकर्मकुशला शीघ्रं गत्वा ललितोक्तवाचिकं ललिताङ्गाय न्यवेदयत् । तद्रिरंसायां ललिताङ्गं चटूक्तिभिः प्रवर्त्य तन्मनः प्रसादयितुं तं लेखमदात् । स सद्यः पुष्पवान् कदम्ब इव उद्यत्पुलकः प्रेमप्रकाशकं तं लेखं वाचयामास । तद्यथा—

हे सुभग ! यदवधि त्वामपश्यं तदादि वराकी त्वन्मयं सर्वं पश्यामि, तस्मान्मां स्वयोगेनानुगृहाण । स इति तं लेखं वाचयित्वाऽवदत्—" हे चतुरे ! साऽन्तःपुरवासिनी क ?, अहं वणिग्मात्रः क ?, कथं नौ योगः संभाव्यते ?, न ह्येतद्धृदि धर्तुं शक्यते, म्रियते चेत्तर्हि वक्तुं न शक्यते, यद्राजभार्यया रंस्ये । यदि भूमिस्थेन चन्द्रकला स्प्रष्टुं शक्यते, तदा राजपत्न्यप्यन्यपुरुषैर्भोक्तुं शक्यते । " दास्युवाच—" असहायस्य सर्वमपि दुष्करम्, तव त्वहं सहायाऽस्मि, अतो हे सुन्दर ! चिन्तां मा कृथाः, त्वं मद्बुद्ध्याऽन्तःपुरमध्येऽपि पुष्पमध्ये स्थित इव संचरिष्यसि । भयेनालम् " समये मामाह्वयेरिति तेनोक्ता चेटी सद्यो गत्वा हर्षोच्छ्वसद्धुवे राज्यै तदुवाच—

तत्प्रभृति तत्सङ्गमं चिन्तयन्त्या ललिताया एकदा तत्र पुरे सुन्दरः कौमुद्युत्सवोऽभूत् । तदा राजा शस्यप्रशस्यक्षेत्रायां क्षीरधवलसरोजलायां बहिर्भुव्याखेटकलीलया ययौ । तदा परितो विजनीभूते राजवेश्मनि ललिता तयैव दास्या ललिताङ्गमाह्वयत् । सा चेटी राज्या विनोदमुद्दिश्य नवयक्षप्रतिमाच्छलेन तं नरमन्तःपुरे प्रावेशयत् । ललिता ललिताङ्गश्च तावुभौ चिराज्जातसङ्गमौ लतावृक्षाविव परस्परं गाढमालिलिङ्गतुः । ततोऽनुमानादिकुशला अन्तःपुरपालका निश्चितं कस्यचित्पुरुषस्य प्रवेशोऽन्तःपुरेऽभूदित्यज्ञासिषुः । अहो वयं वञ्चिताः स्म, इति तेषां चिन्तयतां राजाऽऽखेटकक्रीडां समाप्याऽऽययौ । ते राज्ञे निष्कपटमज्ञापयन्—" हे राजन् ! अस्माकमाशङ्क्यमस्ति यदन्तःपुरे कोऽपि परपुरुषः प्रविष्टोऽस्ति । तस्माद् राजोपानच्छब्दवर्जितं पादक्रमणगोपनपूर्वकं च चौर इव शुद्धान्ते प्रविवेश । सा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चेटी द्वारदत्तदृष्टिर्दूरादागच्छन्तं राजानं दृष्ट्वा राज्ञ्यै ज्ञापयाञ्चकार । दासी राज्ञी च तं जारमुपरितनमार्गेणावकरराशिमिव शीघ्रं बहिश्चिक्षिपतुः । स जारो गृहात् पश्चात्तनप्रदेशे महावटे पपात । ततो गुहायामुलूक इव निलीय स तत्रैवास्थात् । दुर्गन्धिमयेऽशुचौ तत्र कूपे नरकावास इव पूर्वसुखं स्मरन्नवातिष्ठत; सोऽचिन्तयच्च–“ यदि कथंचिदस्मात् कूपादहं निःसरिष्यामि तदाऽहमीदृशपरिणामभोगं न करिष्यामि । ” दासी राज्ञी च तत्र कूपे स्थिताय तस्मै कूपयोच्छिष्टं चिक्षिपतुः, तेनैव स जारोऽजीवत् । ततो वर्षासमये समागते गृहप्रस्रवणजलेन स कूपः पातकेन दुष्टधीरिव पूर्णोऽभूत् । स तेन परमवेगेन जलेन शबवद् वाहयित्वा वप्रद्वारिकया बाह्यपरिखायामनीयत, स जलपूरेण महदलाबुफलमिवाऽऽन्दोल्य परिखातीरेऽक्षेपि । ततः स जलेनार्तो मुमूर्च्छ । दैवात् कुलदेवतयेवाऽऽगतया धात्र्या दृष्टः संगोप्य गृहे नीतश्च । स कुटुम्बेन स्नानाभ्यङ्गभोजनादिभिः पाल्यमानश्छिन्नप्ररूढवृक्ष इव पुनर्नवीनोऽभूत् ।

अत्रायमुपनयः–यथा हि ललिताङ्गः कामभोगेषु समासक्तस्तथा देहिनां जीवः । यथा राज्ञीभोगस्तथा वैषयिकं सुखम्, तदापातमधुरं परिगामातिदुःखदम् । गर्भः कूपवाससमानः; मातृभुक्तान्नपानाद्यैर्यद् गर्भपोषणं तदुच्छिष्टभोजनसदृशम् । यो मेघजलपूरिताद् विष्ठाकूपात् खालेन निर्गमः स पुद्गलोपचिताद् गर्भाद् योनितो निर्गमः । प्राकाराद्बहिस्थे परिखोत्सङ्गे यत् पतनं तत् सूतिकागृहे गर्भवासात् पतनम् । जलपूर्णपरिखातटस्थस्य या मूर्च्छा सा जरायुशोणितमयात् कोशाद् बहिःस्थस्य मूर्च्छा । या देहपालिका धात्री सा कर्मपरिणामसन्ततिस्त्वया ज्ञातव्या । हे प्रियाः ! यदि राज्ञी ललिताङ्गरूपमोहिता सती तं चेटीद्वाराऽन्तःपुरं पुनः प्रवेशयेत्तदा ललिताङ्गः किं तत्र प्रविशेत् ? । ” पत्न्य ऊचुः–“ सोऽल्पधीरपि कथमनुभूतं विष्ठागर्तपातजं दुःखं स्मरन् राज्ञोऽन्तःपुरं प्रविशेत् ? । ” ततो जम्बूरुवाच–“ हे प्रियाः ! सोऽज्ञानवशेन प्रविशेदपि, अहं तु गर्भसंक्रान्तिहेतुं नाऽऽश्रयिष्यामि । ”

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ जम्बूस्त्रियो विज्ञातदृढनिर्णयाः प्रतिबुद्धाः क्षमयित्वैवं जगदुः–" हे नाथ ! त्वं स्वयं यथा निस्तरसि तथाऽस्मानपि भवाब्धिस्तारय, यतो महाशया आत्मकुक्षिम्भरित्वेन न संतुष्यन्ति । " ततो जम्बूनाम्नः पितरौ श्वशुरा बान्धवाश्चोचुः–" हे जम्बूः ! त्वं साधूक्तधर्माऽसि, अतः परमस्माकं परिव्रज्या भवतु ।

जम्बूप्रभवयोः प्रव्रज्या ।

ततः प्रभवनामकश्चौरोऽप्युवाच–" हे मित्र ! अहमपि शीघ्रं पितृनापृच्छ्य तव परिव्रज्यासहायो भविष्यामीह न संदेहः " । " हे सखे ! तवाविघ्नमस्तु, प्रतिबन्धं मा कृथाः " इति जम्बूकुमारोऽपि प्रभवं चौरं प्रत्युवाच । ततो महामना जम्बूकुमारः प्रातःकालेऽभिनिष्क्रमणोत्सवं स्वयमुच्चैश्चकार । कल्पवित् स स्नात्वा सर्वाङ्गीणं चाङ्गरागं कृत्वा रत्नमयानलङ्कारान् दधौ, अयं कल्पोऽस्तीति ।

अथानादृतेन देवेन कृतसन्निधिर्जम्बूर्नरसहस्रेणोद्वाह्यां शिबिकामारुरोह । निनदन्मङ्गलवाद्यः पठन्मङ्गलपाठक उत्तार्यमाणलवणः स्वकीयमानमङ्गलः कल्पतरुरिव विश्वजनहितं दानं कुर्वाणो लोकैः प्रशस्यमानः काश्यपगोत्रजातो जम्बूः सुधर्मस्वामिगणधरचरणकमलपूतं कल्याणसम्पदास्पदं तं वनोद्देशं जगाम । स निर्ममो गणधरशोभिताऽऽरामद्वारदेशे संसारादिव शिबिकामध्यादुत्ततार । तत्राऽऽपदम्बुधितारकान् सुधर्मस्वामिपादान् पञ्चाङ्गस्पृष्टभूपृष्ठः सन् गणधरतो दीक्षामिच्छुर्व्यजिज्ञपत्–" हे परमेश्वर ! भवसागरतरीं प्रव्रज्यां मम सस्वजनस्याप्यऽनुकम्प्य देहि " तदा पञ्चमगणधरोऽप्येवं पार्थितः सपरिवाराय तस्मै यथाविधि दीक्षां ददौ । अन्येद्युः प्रभवोऽपि पितृनापृच्छ्य तत्र समागतो जम्बूकुमारमनुगच्छन् परिव्रज्यामग्रहीत् । स प्रभवः श्रीजम्बूस्वामिचरणकमलमरालोऽभवत् । यतो गुरुणा तस्यैव शिष्यत्वेन समर्पितः । ततो जम्बूमुनिः श्रीसुधर्मस्वामिगणधरपादारविन्दमिलिन्दः दुःसहान् परीषहानगणयन् पृथिवीं व्यहार्षीत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुधर्मस्वामिगणधरस्य चम्पायां आगमनम् ।

एकदा गणधरः श्रीसुधर्मा जम्बूस्वाम्यादिशिष्ययुतो भुवि विहरंश्चम्पानगरीं जगाम । उद्भूतधर्मकल्पतरुसमः परमेश्वरो गणधरः स नगरपरिसरारामे समवासरत् । ततस्तं वन्दितुं नगरलोका भक्त्या हर्षितहृदया गन्तुं प्रावृतन् । झणझणशब्दयुतनूपुरा काश्चित् नार्यः पादचारेण श्लथधम्मिल्लस्थपुष्पमाल्याः जग्मुः । काश्चिच्च नार्यः पतिभिः सह रथमारुह्य शीघ्रं शीघ्रं रथान् चालयामासुः । काश्चिच्छ्राविकास्त्यक्तान्यकर्माणो कपियुतवृक्षा इव कट्यारोपितबाला गृहान्निर्जग्मुः । केऽपि महेभ्याश्चलत्कुण्डला अश्वारूढा धवलच्छत्रैर्दिवं पुण्डरीकिणीं कुर्वाणा निर्जग्मुः । शीघ्रं गच्छतां श्रीमतां परस्परसङ्घर्षताडनान्निपतितैर्हारमुक्ताफलैर्मार्गभूमिर्दन्तुराऽभूत् । तदा तस्यां नगर्यां कूणिको नाम राजा गच्छतो लोकान् दृष्ट्वा वेत्रधरं पप्रच्छ—

कूणिकनृपस्य वंदनार्थं गमनम् ।

"अद्य किं कस्याश्चिद्देव्या यात्रा पुरसमीपे वर्तते ? कस्यापि वा महाश्रेष्ठिन उद्यापनिकोत्सवोऽस्ति ?, किं कौमुदीसमानः कोऽपि महानुत्सवः समागतः ?, अथवोद्यानचैत्ये पूजाविशेषो वर्तते ?, किंवा कोऽपि महात्मा जैनमुनिः समागमत् ? यदेषोऽखिलनगरीजनः शीघ्रं गच्छति ।" तदैव वेत्रधारी विज्ञाय तद्वृत्तं राजानं व्यजिज्ञपत्–"हे राजन् ! इह श्रीसुधर्मस्वामी गणधरवरः समवसृतो विराजते, अयं सर्वः पुरजनस्तत्पदान् वन्दितुं याति, तवैकातपत्रार्हद्धर्मराज्यं विजयते ।" राजोवाच–"हे वेत्रिन् ! अयं पुरजनो धन्योऽस्ति, यः श्रीसुधर्मस्वामिवन्दने एवं त्वरते । अहो अहं जाग्रदवस्थोऽपि सुषुप्तावस्थतां प्रापम्, यतोऽहं गणधरदेवमपि नाज्ञासिषम्, तस्मादहमपि गणभृच्चरणान् शीघ्रं गत्वा वन्दे, यतस्ते पवनवद् प्रतिबद्धा एकत्र न तिष्ठन्ति, इति प्रफुल्लकमललोचनो राजोत्थाय चन्द्रकिरणैरिव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्मिते धवलवस्त्रे पर्यधात् । अथ कर्णतलयोः स्वच्छमुक्ताकिरणसमूहपूरिते सुधाकुण्डे इव मौक्तिककुण्डले दधौ । पुनर्हृदये लावण्यनदीतीरस्थां फेनरेखामिव विमलमौक्तिकं हारमालम्बयामास । भूभारधरोऽपरकल्पवृक्ष इव स राजाऽन्यान्यपि सर्वाङ्गरत्नालङ्करणानि बभार । पवनचञ्चलाऽञ्चलमाकाशस्फटिकधवलं तत्स्पर्शान्नृत्यन्तमिव चोलकं पर्यधात् । सुगन्धिपुष्पमाल्यगर्भितं कज्जलकांतिं ग्रस्तचन्द्रवर्षर्तुमेघसमं धम्मिल्लं मस्तके बबन्ध । शत्रुवारणः स राजा भद्रकारणं भद्रवारणं सिंह इव पर्वतं निश्रेणित आरोहत् । स भूमिवासवो गगने विद्युल्लेखामिव कराभ्यां सृणिं नर्तयन् पादाभ्यां हस्तिनं प्रेरयामास । मम निर्भरैः पादघातैः पृथ्वी भङ्गुरा माभूदिति स हस्ती कृपयेव मन्दं मन्दं गन्तुं प्रचक्रमे । ऊर्जितं गर्जन् मदजलं निरन्तरं वर्षन् स हस्ती जनेन भूमिगतो मेघ इवालक्षि । तथाऽऽरूढसादिनो नृत्यन्त इव वल्गन्तो मुखाग्रस्पृष्टजानवो लक्षशोऽश्वास्तं गजं प्राववुः । तत्पुरो विजयसूचकानि तूर्यवर्याण्यनेकशो तदायुक्तैः पुरुषैः परस्परं संवलितशब्दमवाद्यन्त । तूर्याणामभितः प्रतिध्वनिभिरपौरुषेयं शब्दायमानमुद्दामं वाद्यान्तरं नभोऽभवत् ।

अथ सपरिच्छदो राजा श्रीसुधर्मस्वामिगणधरचरणकमलशोभितं वनोद्देशं प्राप । राजशिरोमणिः कुम्भोपरि सृणिदण्डप्रहारेण स्थापिताद् गजात् कक्षां गृहीत्वाऽवततार । त्यक्तपादुको दूरीकारितच्छत्रचामरो महाभुजो भूपो वेत्रिबाहुमपि विहाय वन्दारून्छ्रावकान् पश्यन् उद्यद्रोमाञ्चकञ्चुकं स्वमपि पश्यन् भक्त्या साधारणजनसमं स्वं मन्यमानः श्रीसुधर्मस्वामिनं दृष्ट्वा बद्धाञ्जलिना मुकुटोपरि मुकुटीकुर्वाणः स नृपो दूरादपि ववन्दे । भक्ताग्रगण्यो राजा तं नत्वा तत्पुरतस्तन्मुखदत्तदृष्टिस्तच्छिष्यपरमाणुरिवोपविवेश । ततः प्राणिकारुणिको गणधरः श्रोतृश्रोत्रामृतप्रपां धर्मदेशनामकरोत् । देशनावसाने गणभृच्छिष्यान् पश्यन् राजा जम्बूस्वामिनमुद्दिश्य परमेश्वरं पप्रच्छ—" हे भगवन् ! एतस्य महर्षे रूपं सौभाग्यं तेजश्च सर्वमप्यद्भुतं दृश्यते; तथाहि—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्य केशा यमुनातरङ्गकुटिलश्यामलाः, नेत्रे श्रवणान्तविश्रान्ते, नासा नालकमले इव, श्रवणे नेत्रसरस्तीरस्थे शुक्तिके इव, कण्ठः कम्बुसमः, वक्षस्थलं कपाटोपमम्, बाहुदण्डौ सरलावाजानुलम्बिनौ दीर्घौ, मध्यदेशो मुष्टिग्राह्यः, जानुयुगलं गजबन्धनकाष्ठमिव, जङ्घे हरिणीजङ्घासमे, पाणिपादं कमलमिव । एतस्य रूपसम्पदं मादृशो वक्तुं किं शक्नोति ? । अस्य महाभागस्य सौभाग्यं वाग्गोचरतां नैति, यदेनं बन्धुवत् पश्यतो मे मनः प्रीयते । अयं महातेजाः कोऽस्ति ?, तथा तेजसाऽस्य यादृशं रूपमस्ति तद् द्रष्टुं न शक्यते । अस्य महामुनेरधृष्यं चाभिगम्यं च तेजः, किं सूर्याचन्द्रमसोस्तेज एकत्राऽऽकृष्य पिण्डीकृतम् ? । अस्य तपोनिधेस्तेजःपुञ्जः कियत् कथ्यते, यत्पादनखकिरणानामपि विद्युद् दासीव लक्ष्यते । " श्रीज्ञातपुत्रो यथा पुरा श्रेणिकायाऽऽचष्ट तथा सुधर्मस्वामी जम्बूप्राग्भववृत्तान्तमस्मै जगाद । इत्युक्त्वोवाच–" राजन् ! पूर्वजन्मतपसाऽस्यैतादृशानि रूपसौभाग्यतेजांसीक्ष्यन्ते " । स एव परमेश्वर उवाच–" राजन् ! अयमन्तिमशरीरश्चरमश्च केवली वर्तते । अस्मिन्नेव भवे सेत्स्यति " । पुनः सुधर्मस्वामिनेदमुक्तम्–" जम्बूनाम्नि शिवं गते मनःपर्यायो न भावी, परमावधिश्च न भावी, आहारकवपुर्लब्धिर्न, तथा जिनकल्पो न, पुलाकलब्धिर्न, क्षपकश्रेणिरोहणं न, तथा क्वचिदपि उपरितनं संयमत्रयं न, एवमग्रेऽपि हीनहीनतरर्द्धिता भविष्यति । " राजैवं श्रीसुधर्मस्वामिवचनं श्रुत्वा तच्चरणकमले वन्दित्वा चम्पापुरीं ययौ । सुधर्मोऽपि सपरिच्छदस्ततस्थानाच्छ्रीमहावीरप्रभुपादान्तिके जगाम, तत्समं च विजहार ।

जम्बूस्वामिनः केवलज्ञानं निर्वाणं च ।

श्रीसुधर्मस्वामिना पञ्चाशदब्देन व्रतं गृहीतम् । चरमार्हतः शुश्रूषा त्रिंशदब्दीं चक्रे । श्रीमहावीरे मोक्षं गते गणधरवरः श्रीसुधर्मस्वामी छद्मस्थः सन् द्वादश वर्षाणि तीर्थं प्रवर्तयंस्तस्थौ । ततो द्वानवत्यब्दीप्रान्ते प्राप्तकेवलो भव्यप्राणिनो बोधयन्नष्टवर्षीं पृथिवीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विजहार । निर्वाणसमये प्राप्ते सति पूर्णवर्षशतायुषा श्रीसुधर्मस्वामिना श्रीजम्बूस्वामी गणाधिपोऽस्थापि । तीव्रं तपस्तप्यमानो जम्बूस्वाम्यपि केवलं लब्ध्वा सद्यो भव्यभविकान् प्रतिबोधयामास । श्रीमहावीरस्वामिमोक्षदिनादपि चतुःषष्टिवर्षाणि व्यतीत्य जम्बूस्वामी कात्यायन-गोत्रं श्रीप्रभवं स्वपदे संस्थाप्य कर्मनिर्जरयाऽव्ययपदमाप ।

इति–शासनसम्राट्–तीर्थोद्धारक–बालब्रह्मचारि–आचार्यदेवश्रीविजयनेमिसूरीश्वरपट्टालङ्कार–शान्तमूर्ति–समयज्ञ–आचार्य-देवश्रीविजयविज्ञानसूरीश्वरपट्टधर–सिद्धान्तमहोदधि–प्राकृतविद्विशारदाचार्यविजयकस्तूरसूरीश्वरशिष्यरत्न–व्याख्यानवाचस्पति–पन्न्यासप्रवरश्रीयशोभद्रविजयगणिवरशिष्य–विद्वद्वर्य–**मुनिश्रीशुभङ्करविजयेन** विरचितं गद्यात्मकं परिशिष्टपर्वोद्धृतं चरमभवात्मकं श्रीजम्बूस्वामिचरित्रम्

समाप्तम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अमारी श्रीहर्षपुष्पामृतजैनग्रन्थमालाना माननीय
मेम्बर तथा सहायक श्रेष्ठिवर्य

श्रीयुत उमेदचन्द सुराभाई शाह.

जेमना स्मरणार्थे आ कथानक छपावेल छे.
ते स्वर्गस्थ

भाईश्री रमणलाल जीणाभाई शाह.

ACHARYA SHRI KAILASSAGARSURI GYANMANDIR
SRI MAHAVIR JAIN ARADHANA KENDRA
Koba, Gandhinagar-382 009.
Phone : (079) 23276252, 23276204-05

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only